

रम्यनाटकानि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रम्यनाटकानि

संस्कृतकार्यालयः
श्रीअरविन्दाश्रमः, पुदुच्चेरी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमसंस्करणम् – डिसेम्बर, २००२

Available at
SABDA, Pondicherry - 605 002

ISBN 81-7058-690-9

प्रकाशकः संस्कृतकार्यालयः, श्रीअरविन्दाश्रमः, पुदुच्चेरी - २
मुद्रकः श्रीअरविन्दाश्रम-मुद्रणालयः, पुदुच्चेरी - ६०५ ००२

Ramyanātakāni. Written by Dr. Narendra. Published by Sanskrit Karyalaya, Sri Aurobindo Ashram, Pondicherry. Printed at Sri Aurobindo Ashram Press, Pondicherry (India).
First Edition : December, 2002

Rs. 25.00

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयसूची

अरिजयः	...	१
कुत्र मे लेखनी ?	...	१०
परीक्षा	...	३९
अश्वमेधः	...	७२
मुक्तिसंग्रामः	...	९९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आमुखम्

नाटकं भाषाशिक्षणाय उत्तमं साधनम्। छात्राः पाठवर्गात् रङ्गमञ्चे अधिकं शिक्षन्ते।

अस्माकं विद्यालयस्य छात्राः नाटकप्रियाः। नृत्यगीतैः संवलितानि एतानि पञ्च नाटकानि उपचतुर्दशवर्षीयैः तैः सफलतया प्रयुक्तानि। अन्ताराष्ट्रिये क्षेत्रेऽस्मिन् आङ्ग्लभाषायाः बहुल-व्यवहारात् चतुर्णां नाटकानाम् उपस्थापनम् आङ्ग्लभाषया कृतम्। तद् वयम् अत्र तथैव प्रकाशयामः।

कस्या अपि भाषायाः शिक्षणाय प्रचुरम् अध्ययनं भाषणं च कर्तव्यम्। आधुनिक-छात्राणां साधारण-पाठकानां च पठनाय सरला, शिक्षाप्रदा रुचिकरी च सामग्री अत्यल्पा लभ्यते। एतद् अनुभूय अस्माभिः बहूनि पुस्तकानि प्रकाशितानि। तेषु इदम् अन्यतमम्।

मनोरञ्जनप्रधानेषु एषु नाटकेषु अन्येषां रसानाम् अपि आस्वादनं कर्तुं शक्यते।

— प्रकाशकः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अरिजयः

आख्याता – अस्य नाटकस्य कथा ब्रह्मपुराणात् गृहीता। कथायाः बीजम् ऋग्वेदस्य प्रथममण्डले निहितम्। कथायाः नायकः गार्ग्य-भारद्वाज-सत्यकाम-कात्यायन-प्रभृतीनाम् आचार्यः इति प्रश्नोपनिषदि वर्णितम्।

रुचिरमिदं यत् अनेन स्थानेन सह अस्याः कथायाः सम्बन्धः वर्तते। यत्र श्रीमातुः, श्रीअरविन्दस्य समाधिः अस्ति तत्र अगस्त्यमुनेः आश्रम आसीत् इति भवन्तः जानन्ति। अगस्त्यमुनेः पत्न्याः नाम लोपामुद्रा। लोपामुद्रायाः भगिनी गभस्तिनी अस्माकं नायकस्य माता। नाटकस्य प्रथमदृश्ये वयं तां पश्यामः।

प्रथमदृश्यम्

(नेपथ्ये शिशोः क्रन्दनं श्रूयते। गभस्तिनी तत्र पश्यन्ती प्रविशति।)

गभस्तिनी – हे वनदेवताः, हे अष्ट दिक्पालाः, पितृहीनम्, मातृहीनम्, बन्धुहीनम् इमं शिशुं रक्षत। हे ओषधयः, हे वनस्पतयः, हे पशुपक्षिणः, अस्य पिता युष्मान् पुत्रवत् अपालयत्। दिवं गतस्य तस्य इमं निःसहायं शिशुं पालयित्वा पितृऋणं परिशोधयत। *(शिशोः क्रन्दनम्)* हे अग्निदेव, हे जातवेदः, नय मां तत्र यत्र त्वया मम पतिः नीतः। *(अग्निं प्रविशति।)*

पृष्ठतः श्रूयते –

ॐ वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।
ॐ क्रतो स्मर, कृतं स्मर, क्रतो स्मर, कृतं स्मर।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयदृश्यम्

पिप्पलादः – हे पिप्पलवृक्ष, हे ओषधयः, युष्माभिः अहं द्वादशवर्षाणि पुत्रवत् पालितः। युष्माकं प्रार्थनया सोमदेवः माम् अमृतम् अपाययत्। नमो वः। हे पादपाः, हे पशुपक्षिणः, मां प्रति युष्माकम् उपकारः, युष्माकं पुत्रस्नेहः अविस्मरणीयः। नमोऽस्तु वः, नमोऽस्तु वः।

(इन्द्रस्य द्वौ गुप्तचरौ निभृतं पश्यतः)

प्रथमः – *(सव्यङ्ग्म्)* एष वृक्षम्, वनस्पतिम्, पशुम्, पक्षिणं भक्तिगद्गद-हृदयेन प्रणमति। किम् एष पागलोऽस्ति ?

द्वितीयः – त्वं कथं मनुष्यवत् आचरसि ? मर्त्यलोकम् आगत्य त्वया किं देवत्वं विस्मृतम् ?

प्रथमः – स्वाभाविकम्।

द्वितीयः – तदा देवकार्यं कथं करिष्यसि ? कर्तव्यं स्मर। अन्तर्दृष्ट्या पश्य। अस्य गतिवृत्ति-निरीक्षणम् अस्माकं कार्यम्।

पिप्पलादः – हे वनस्पतयः, अद्य युष्माकं प्रसादात् मया आत्मपरिचयः प्राप्तः। *(क्रोधेन दृढतापूर्वकम्)* अधुनाहं स्वजन्मकथां जानामि। *(निष्क्रान्तः)*

प्रथमः – किम् एष स ऋषिकुमारः यस्य माता द्वादशवर्षेभ्यः पूर्वम् अग्नौ प्रविश्य सती अभवत् ?

द्वितीयः – आम्। एष महर्षि-दधीचेः पुत्रः पिप्पलादः।

प्रथमः – किन्तु महर्षिपुत्र एषः किमर्थं क्रोधजर्जरः ?

द्वितीयः – अस्य हृदये प्रतिशोधस्य अग्निर्ज्वलति।

प्रथमः – प्रतिशोधः ? कस्य प्रतिशोधः ? किमर्थं प्रतिशोधः ? तस्य पिता तु . . .

द्वितीयः – एहि, कथयामि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयदृश्यम्

(पिप्पलादः ॐ नमः शिवाय इति जपति। अप्सराः आगत्य नृत्यन्ति, तस्य तपोभङ्गं कर्तुं प्रयतन्ते। नृत्यान्ते –)

उर्वशी – तपस्विन् ! अहं स्वर्गस्य अप्सरा। उत्तिष्ठ।

तिलोत्तमा – उर्वशि, धन्य एष ऋषिकुमारः यः तव सुन्दरं रूपं द्रष्टुं शक्नोति।

रम्भा – तिलोत्तमे, तव रूपं द्रष्टुम् इन्द्रः सहस्रनेत्रः अभवत्। त्वम् इमं कुमारं द्रष्टुम् अत्र आगता ? सौभाग्यम् अस्य।

उर्वशी – बन्धुवर पिप्पलाद, नेत्रम् उन्मीलय। यां द्रष्टुं देवगणा अधीरा भवन्ति सा तव सम्मुखे विराजते।

तिलोत्तमा – एष न पश्यति।

रम्भा – अस्मिन् मोहिनीविद्या कार्यं न करोति। किं कर्तव्यम् ?

मेनका – वत्स पिप्पलाद, प्रिय पुत्र मम। उत्तिष्ठ। अहं तव माता गभस्तिनी। पश्य, नेत्रम् उन्मीलय।

रम्भा – अस्य ध्यानभङ्गः असम्भवः। *(सर्वाः अप्सराः निष्क्रान्ताः)*

शिवः – वत्स पिप्पलाद, अद्य त्वया कामजयः कृतः। भद्रं ते। वरं वरय।

पिप्पलादः – *(नेत्रे उन्मील्य)* हे महादेव ! हे आशुतोष ! मह्यं तादृशं सामर्थ्यं ददातु येन अहं पितृहत्याकारिणं देवगणं नाशयितुं शक्नुयाम्।

शिवः – *(विहसन्)* तत् तथा सरलं नास्ति। कथय, मम कति नेत्राणि पश्यसि ?

पिप्पलादः – द्वे पश्यामि भगवन् !

शिवः – यदा त्वं ध्याने मम तृतीयं नेत्रं द्रक्ष्यसि तदा तव सङ्कल्पसिद्धिर् भविष्यति। *(निष्क्रान्तः)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पिप्पलादः – तृतीयं नेत्रम् ? अवश्यं द्रक्ष्यामि। *(पुनः ध्यानस्थः। देवाः प्रविष्टाः)*

देवी – *(दूरात् आह्वयन्ती इव)* पिप्पलाद, पिप्पलाद, पिप्पलाद, अहं त्वां सर्वत्र अन्वेषयामि। त्वम् अत्र निर्जनजङ्गले साधनां करोषि ? पश्य– अहं लोपामुद्रा, तव मातुः भगिनी। च्च च्च ! अनाहारेण पुत्रस्य शरीरं कियत् दुर्बलं जातम्। चल वत्स, दुर्बल-शरीरे साधना न भवति। चल, अस्माकम् आश्रमे तुभ्यं सुस्वादु भोजनं दास्यामि। सम्यक् खादित्वा, सुस्थशरीरेण साधनां करिष्यसि। उत्तिष्ठ। साधनायै, आशुसिद्धिलाभाय अस्माकम् आश्रमवत् उत्तमं स्थानं कुत्रापि न प्राप्स्यसि। उत्तिष्ठ, एहि। *(निराशया अन्यान् प्रति)* तस्य किमपि न भवति !

प्रथमः देवः – पश्यामः। *(स्वस्य देवमुकुटम् अपाकृत्य, देव्यै दत्त्वा, शिरसि सर्पभूषणं धारयित्वा नटराजमुद्रया)* देवि पार्वति !

द्वि. देवः – *(अवगुण्ठनधारणं नाटयन् नारीस्वरेण)* आदिशतु आर्यपुत्र !

प्र. देवः – गणेशः कुत्र ?

द्वि. देवः – स्कन्देन सह मल्लयुद्धं करोति आर्यपुत्र !

प्र. देवः – शीघ्रं गत्वा कथय . . .

द्वि. देवः – किं कथयानि प्राणनाथ ?

प्र. देवः – गत्वा गणेशं कथय – सः अस्मै बालतपस्विने सर्वां सिद्धिं ददातु। एष मम आदेशः।

द्वि. देवः – तथास्तु प्राणेश्वर !

प्र. देवः – *(पिप्पलादस्य कर्णनिकटे डमरुं वादयित्वा)* वत्स पिप्पलाद ! अद्य तव साधना पूर्णा। मम तृतीयं नेत्रं पश्य।

द्वि. देवः – *(पुरुषस्वरेण)* वत्स पिप्पलाद ! अहं सिद्धिदाता गणेशः। कां सिद्धिम् इच्छसि ? कथय।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृ. देवः – अस्मिन् देवमायापि न प्रभवति। किं कर्तव्यम् ? *(सर्वे चिन्तामग्नाः)*

च. देवः – अस्ति उपायः। एनं कोपयिष्यामः।

तृ. देवः – आम्। मुनिसत्तम-पितुः एषः अधमाधमः पुत्रः।

च. देवः – पिता उदारहृदयः, पुत्रः हिंसापरायणः।

द्वि. देवः – पिता त्रिलोक-वन्दनीयः, पुत्रः देवद्वेषि-दानवः ! छिः

प्र. देवः – आ छिः *(क्षौति। सर्वे ध्यानस्थं पिप्पलादं परिवारयन्ति।)*

द्वि. देवः – जना देवत्वं प्राप्तुं साधनां कुर्वन्ति। त्वं देवान् नाशयितुं साधनां करोषि ? गर्दभः।

तृ. देवः – धिक् त्वाम्।

च. देवः – शतवारम्, सहस्रवारं धिक् त्वाम्।

तृ. देवः – कृतघ्न, यः सोमदेवः अमृतं दत्त्वा त्वाम् अजीवयत् त्वं तस्य कुलं नाशयितुम् इच्छसि ?

च. देवः – अस्य बुद्धिर्नष्टा।

तृ. देवः – अस्य मतिर्भ्रष्टा।

द्वि. देवः – अस्य गतिर्नास्ति।

प्र. देवः – अस्य स्थितिर्नास्ति। *(मारयितुम् उद्यतः)*

च. देवः – आम्, एष मारणीयः। अन्यथा एषः अस्मान् मारयिष्यति।

तृ. देवः – खलबुद्धे, मलबुद्धे, हलाहल-बुद्धे ! त्वं देवान् मारयित्वा पृथिव्याम् असुरराज्यं स्थापयितुम् इच्छसि ? देवद्रोहिन् ! गच्छ इतः। *(पिप्पलादस्य मुखे प्रसन्नता, तथापि सः ध्यानस्थः)*

प्र. देवः – असाध्य एषः, कोपमपि न करोति।

द्वि. देवः – तर्हि उपायः ?

च. देवः – *(भयेन)* पश्य तत्र। का सा ?

दानवी – हॅ हॅ हॅ, भोजनम्, भोजनम् इच्छामि, भोजनम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वि. देवः – *(पिप्पलादं दर्शयन्) खाद, एनं खाद।*

दानवी – त्वामपि खादिष्यामि।

द्वि. देवः – कृपया मां न खाद। मम माता क्रन्दिष्यति। *(तृतीयदेवं दर्शयन्)* एनं खाद। *(दानवी तं प्रति गच्छति। सः पलायते किन्तु दानवी तं धरति गर्जति च।)*

तृ. देवः – खाद, मां खाद। मम मातामहीं जानासि ? सा त्वां खादिष्यति। हुँः *(आत्मानं मोचयति। चकिता दानवी वीरदर्पेण गच्छन्तं तं पश्यति।)*

पिप्पलादः – *(उत्थाय)* अद्य मम साधना पूर्णा। अद्य मम तपस्या सफला।

दानवी – हॅ, भोजनं देहि।

पिप्पलादः – *(निर्भयम्)* का त्वम् ?

दानवी – अधुनैव त्वया शिवस्य तृतीयं नेत्रं न दृष्टम् ?

पिप्पलादः – आम्, दृष्टम्। किन्तु त्वं का ?

दानवी – हॅ . . . हॅ . . . अहं शिवस्य तृतीय-नेत्रात् जातं तव तपस्यायाः फलम्। भोजनं देहि।

पिप्पलादः – त्वं देवान् खादितुं शक्नोषि ?

दानवी –शीघ्रं देहि। अहं सर्वभुक्।

पिप्पलादः – *(देवान् दर्शयन्)* तर्हि एतान् खाद। प्रथमम् इन्द्रं खाद।

दानवी – हॅ . . . हॅ . . . हॅ . . . *(देवान् अनुधावति। ते पलायन्ते।)*

पिप्पलादः – देवान् नाशयित्वा अहं पितृहत्यायाः प्रतिशोधं ग्रहीष्यामि।

दानवी – *(प्रत्यागत्य)* भोजनं देहि।

पिप्पलादः – किम् इन्द्रः खादितः ?

दानवी – *(क्रन्दन्ती)* नहि, स शिवस्य शरणं गतः। अहम् इन्द्रं खादितुम् इच्छामि।

पिप्पलादः – आम्, इन्द्रम् अवश्यं खाद।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दानवी – *(पिप्पलादस्य हस्तं निरीक्ष्य आश्चर्येण)* इन्द्र ! त्वम् अत्र लुक्कायसे ?

पिप्पलादः – कुत्र ?

दानवी – तव हस्ते इन्द्रं पश्यामि, तव हृदये वरुणं पश्यामि, तव नेत्रे सूर्यं पश्यामि। तव अङ्गेषु देवान् पश्यामि। हा हा हा। त्वाम् एव खादिष्यामि।

पिप्पलादः – *(भयेन)* नहि, नहि।

दानवी – *(आनन्देन)* तव देहे सर्वे देवाः सन्ति। *(खादितुं गच्छति)*

पिप्पलादः – महासमस्या। शिव, शङ्कर, महादेव, रक्ष माम्, रक्ष माम्। *(पलायनपरः। दानवी तम् अनुधावति। यदा सा तस्य निकटम् आगत्य आक्रामति तदा सः 'ॐ नमः शिवाय' इति उच्चारयति। दानवी भयेन पृष्ठम् अपसरति। तदा पिप्पलादः तां पश्यन् पृष्ठं गच्छति। सा पुनः आक्रामति। सः पुनः 'ॐ नमः शिवाय' इति उच्चारयति। दानवी भयेन पृष्ठम् अपसरति। एवं द्वौ निष्क्रान्तौ।)*

अन्तिमदृश्यम्

शिवः – देवराज, अग्निदेव, वायुदेव ! एष पिप्पलादः यत् कथयति तत् किं सत्यम् ? युष्माभिः अस्य पितुः हत्या कृता ?

इन्द्रः – नहि महेश्वर ! महान् तस्य पिता। देवकुलस्य रक्षणाय, वृत्रासुरस्य मारणाय स स्वेच्छया शरीरम् अत्यजत्।

वायुः – तस्य त्यागं विना देवकुलं कदा लुप्तम् अभविष्यत्। अतीव कृतज्ञा वयम्।

पिप्पलादः – चञ्चलप्रकृतिः वायुदेवः यत् कथयति तत् किं सत्यम् ? किन्तु मया यत् श्रुतम् . . .

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्निः – वनस्पतयः सम्पूर्णां कथां न जानन्ति। शृणोतु। कथयामः। बहुवर्षेभ्यः पूर्वं देवासुरसंग्रामे देवानां विजयः अभवत्।

इन्द्रः – तदा अहं देवैः सह भवतः पितरम् महामुनिं दधीचिम् उपगम्य अवदम् – हे मुनीश्वर, भवतः तपःप्रभावात् दानवाः इमम् आश्रमं प्रवेष्टुं साहसं न कुर्वन्ति। दिव्यास्त्राणि स्थापयितुं वयं सुरक्षितं स्थानं न प्राप्नुमः।

वायुः – तदा उदारहृदयः स महात्मा दिव्यास्त्राणि आश्रमे अरक्षत्। ततः बहूनि वर्षाणि गतानि। तानि आनेतुं वयं न गताः यतो हि प्रयोजनं नासीत्।

अग्निः – तदा भवतः माता महर्षिम् अवदत् – आर्य, दिव्यास्त्राणां रक्षणेन दानवा द्वेषं कुर्वन्ति। तपोयुक्ताः, बलदृप्तास्ते यदि आक्रमणं कुर्युः ?

वायुः – तदा भवतः पिता पुण्यजलानि अभिमन्त्र्य, तैः अस्त्राणि क्षालयित्वा, तद् जलम् अपिबत्।

इन्द्रः – ततः शक्तिहीनानि अस्त्राणि कालक्रमेण नष्टानि अभवन्।

अग्निः – तत्परं पुनः देवासुरसंग्राम आरब्धः।

शिवः – तदा अस्त्रं विना देवाः कथं युद्धम् अकुर्वन् ?

इन्द्रः – स महर्षिः स्वेच्छया शरीरम् अत्यजत्। तस्य अस्थिभिः अस्त्राणि कृत्वा अस्माभिः वृत्रासुरः मारितः, दानवाः पराजिताः।

शिवः – अद्‌भुतम् ! अपूर्वोऽयं त्यागः।

पिप्पलादः – तर्हि मया वनस्पतिभ्यः यत् श्रुतं तत् अर्धं सत्यम् आसीत् !

शिवः – आम् वत्स ! ते गृहस्य अभ्यन्तर-व्यापारं कथं जानीयुः ? प्रखर-बुद्धिमान् मनुष्योऽपि बाह्यघटनाभिः छलितो भवति। का कथा वनस्पतीनाम् ?

पिप्पलादः – अवगतं महेश्वर ! *(देवान् प्रति)* क्षन्तव्योऽहं कृपया।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिवः – वत्स, तव विनयम्, तव भावशुद्धिम्, तव पितृभक्तिं दृष्ट्वा अहम् अतीव प्रसन्नः। त्वया कामजयः कृतः, क्रोधजयः कृतः। तदर्थं वरद्वयं गृहाण। कथय – किम् इच्छसि ?

पिप्पलादः – यदि एवं तर्हि हे महेश्वर, प्रसीदतु येन मम पितुः आश्रमस्य पावित्र्यं चिरकालम् अक्षुण्णं तिष्ठेत्। तत् स्थानं सदा देवानां सुरक्षास्थलं भवतु।

शिवः – तथास्तु। द्वितीयं वरं वरय। *(दानवी प्रविश्य भोजनं भोजनम् इति गर्जति।)*

पिप्पलादः – एषा दानवी देवानां कामपि हानिं न करोतु।

शिवः – तथास्तु।

दानवी – *(उच्चैः)* नहि, नहि ! अहं मर्तुं न इच्छामि। *(चीत्कारं कुर्वती पतित्वा मृता)*

इन्द्रः – हे महात्मन् ! भवता परार्थाय सर्वं याचितम्, स्वार्थाय किमपि न प्रार्थितम्। तस्मात् अन्यं वरं वरयतु। भवते स्वर्गस्य किम् ऐश्वर्यं दद्याम् ? कथयतु। *(देवाः प्रविशन्ति)*

पिप्पलादः – स्वर्गस्य किमपि ऐश्वर्यं न इच्छामि देवराज ! यदि शक्यम्, मम उदारचरित-पित्रोः दर्शनमात्रं कारयतु।

इन्द्रः – धन्यस्त्वम्। धन्या तव पितृभक्तिः। कामजयी, क्रोधजयी त्वं लोभजयी संजातः। पश्य तत्र। *(पितरौ दर्शयति। तौ आशीर्वादमुद्रां कुर्वन्तौ भूतलम् अवतरतः। देवाः पुष्पवृष्टिं कुर्वन्ति। पिप्पलादः पितरौ प्रणमति। पिता तम् आलिङ्गति।)*

(आश्रमविद्यालये १९. ५. २००० दिनाङ्के प्रयुक्तम्।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुत्र मे लेखनी ?

सुसायं सर्वेभ्यः !

Tonight's play कुत्र मे लेखनी (Where is my pen ?) has evolved from a homework set to our Sanskrit class. While dealing with declensions (शब्दरूपाणि), each student was allotted a विभक्ति and was asked to write a story in a dialogue form, using words with different endings, in the singular number. One student wrote on the तृतीया विभक्ति which is used mainly for the instrumental case. The second scene of tonight's play is based on that.

As depicted in this play, many people lose their pen but find a replacement. Most of them are not happy and they search for their original pen.

Similarly, we, the Indians, have lost our original language; and paradoxically we are happy with a replacement. Most of us even do not realise the loss !

Sri Aurobindo says – "Language is the life of a nation." "Language is the sign of the cultural life of a people, the index of its soul in thought and mind that stands behind and enriches its soul in action." "A nation, race or people which loses its language, cannot live its whole life or its real life." He adds – "Nothing has stood more in the way of the rapid progress in India, nothing has more successfully prevented her self-finding and development under modern conditions than the long

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

overshadowing of the Indian tongues as cultural instruments by the English language."

He further says – "The vital question is how we are to learn and make use of Sanskrit and the indigenous languages so as to get to the heart and intimate sense of our own culture and establish a vivid continuity between the still living power of our past and the yet uncreated power of our future."

It is encouraging to note that there is a growing awareness about the importance of Sanskrit all over the country. Camps are being organised where people of different ages learn to speak Sanskrit.

All of us know how much importance the Mother and Sri Aurobindo have attached to the learning of Sanskrit and making it a truly living language. We hope, tonight's play would remove the prevalent misconceptions about Sanskrit being a very difficult language.

The first scene of tonight's play begins in the Headmistress's Office in a Sanskrit-medium school.

प्रथमदृश्यम्

(प्रधानशिक्षिकायाः कार्यालयः। सा किमपि लिखति। सोऽहम्, अर्पितः, कृपा परस्परं सभयम् आलपन्ति।)

सोऽहम् – त्वं गच्छ।

अर्पितः – नहि, त्वं गच्छ।

सोऽहम् – तर्हि कृपा गच्छतु।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृपा – नहि, अहं न गमिष्यामि।

शिक्षिका – के तत्र ? आगच्छत। *(सर्वे प्रविश्य प्रणमन्ति।)* ह्यः युष्माकं वर्गे सूचना न पठिता ?

कृपा – आम् आर्ये, पठिता।

शिक्षिका – युष्माकं विवरणं कुत्र ? सर्वैः दत्तम्, यूयं कदा दास्यथ ? कार्यक्रमं कदा कर्तुम् इच्छथ ?

कृपा – आगामि-शुक्रवारे।

शिक्षिका – अद्य को वारः ?

कृपा – शुक्रवारः।

शिक्षिका – मध्ये कति दिनानि सन्ति ?

कृपा – षड् दिनानि।

शिक्षिका – कार्यक्रमे युष्माकं वर्गः किं कर्तुम् इच्छति ?

कृपा – वयं विचारयामः।

शिक्षिका – विचारयथ ?

सर्वे – आम् आर्ये !

शिक्षिका – किं षड् दिनानि विचारयिष्यथ ? अद्य चतुर्वादनपर्यन्तं विचारं कृत्वा मां कथयत। विद्यालयस्य स्वर्णजयन्ती भवति। शिक्षामन्त्री आगच्छति। युष्माकं कापि चिन्ता नास्ति ? अन्ये वर्गाः किं किं कुर्वन्ति, यूयं जानीथ ?

सोऽहम् – आम् आर्ये, सूचनाफलके अस्ति।

शिक्षिका – अहम् इच्छामि, युष्माकं वर्गः किमपि नूतनं कुर्यात्, पुरस्कारं प्राप्नुयात्। अवगतम् ?

सर्वे – *(प्रसन्नाः)* आम् आर्ये !

शिक्षिका – गच्छत। *(सर्वे प्रणम्य गच्छन्ति)* अद्य चतुर्वादनपर्यन्तं विवरणम् अवश्यं दातव्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(सर्वे बहिरागत्य)

सोऽहम् – किं करिष्यामः ?

अर्पितः – तव किमपि न स्फुरति ?

सोऽहम् – नहि। मम शीघ्रं किमपि न स्फुरति। समयेन प्रयोजनम्।

अर्पितः – तव ?

कृपा – आर्या इच्छति, वयं किमपि नूतनं कुर्याम। किं कर्तुं शक्यते ?

अर्पितः – विचारय। चतुर्वादनपर्यन्तं समयः अस्ति। चतुर्वादने अत्र मेलनीयम्।

सोऽहम् – आम्, तत् तु करणीयम्। किन्तु किं करिष्यामः ?

अर्पितः – अरे, बहुचिन्तां मा कुरु। किमपि भविष्यति।

सोऽहम् – तर्हि त्वमेव चिन्तयित्वा आगच्छ। मम मस्तकाय विश्रामः आवश्यकः।

अर्पितः – अस्तु, अस्तु। पुनर्दर्शनाय।

सोऽहम् – पुनर्दर्शनाय।

द्वितीयदृश्यम्

(विद्यालयस्य अन्तिमा घण्टा। बालकाः खेलसामग्रीं धृत्वा आलपन्तः गच्छन्ति।)

सोऽहम् – सप्तमान्तरं कथम् आसीत् ?

राहुलः – अतीव नीरसम्, अरतिकरम्। मम निद्रा अभवत्।

उज्ज्वलः – ममापि। मह्यम् एष वर्गः नैव रोचते।

सोऽहम् – किन्तु अस्माकं वर्गः रुचिर आसीत्। अद्य अस्माभिः बहु हसितम्।

राहुलः – *(उज्ज्वलं प्रति)* हे ! अद्य सम्यक् खेल। तव कारणात् ह्यः वयं पराजिताः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सोऽहम् – शरीरं क्रीडाक्षेत्रे, मनः अन्यत्र चेत् कथं जेष्यसि ? अद्य सावधानं खेल।

राहुलः – सम्यक् खाद बन्धो !

सोऽहम् – अनेन शरीरेण कथं खेलिष्यसि ?

राहुलः – चल।

(बालिकाः रङ्गमञ्चे स्यूतं स्थापयित्वा खेलितुं गच्छन्ति। नम्रता किमपि चिन्तयन्ती आगच्छति, निजस्योते किमपि अन्वेषयति। पुनः चिन्तयति। वन्दनायाः स्योते अन्वेष्टुं गच्छति। वन्दना लुक्कायमाना पश्यति।)

आहुता – *(प्रत्यागत्य)* नम्रते, अत्र किं चिन्तयसि ? खेलितुम् आगच्छ।

नम्रता – नहि, त्वं गच्छ।

आहुता – तव किं जातम् ? *(नम्रता चिन्तयति)* किं चिन्तयसि ? कथय।

नम्रता – लेखनीं न प्राप्नोमि। केनापि मम लेखनी चोरिता।

आहुता – तव लेखनी चोरिता ? तव तु विदेशीय-लेखनी आसीत्। स्योते सम्यक् पश्य। *(नम्रता पुनः पश्यति)* अहम् अपि पश्यामि। *(पश्यति)* भाग्येन मम लेखनी अस्ति।

नम्रता – अस्माकं वर्गे बहवः चोराः सन्ति। यदि एकं धरेयम् . . .

आहुता – धृत्वा किं करिष्यसि ? त्वं तु दुर्बला।

नम्रता – तदा द्रक्ष्यसि।

श्वेतपद्मा – *(प्रत्यागत्य)* किं भवति अत्र ? नम्रते, तव प्रफुल्लं मुखं गम्भीरं किमर्थम् ? अनया [आहुतया] किमपि कथितम् ?

आहुता – अस्या लेखनी चोरिता।

श्वेतपद्मा – कथम् ? अस्यास्तु उत्तमा लेखनी आसीत् !

आहुता – उत्तमासु कस्य दृष्टिः न पतेत् ?

श्वेतपद्मा – एतत् कार्यम् अवश्यं रविणा शान्तनुना वा कृतम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आहुता – नहि, रविशान्तनू न करिष्यतः। एतत् कार्यं राहुलेन वन्दनया वा कृतम्।

वन्दना – *(हठात् प्रविश्य)* राहुलेन वन्दनया वा कृतम् ? त्वं च दिव्यदृष्ट्या अपश्यः ? मया नम्रतायाः लेखनी चोरिता ?

आहुता – अन्यथा कुत्र गता अस्या लेखनी ? उड्डीना ? बाष्पीभूता ?

श्वेतपद्मा – अस्माकं वर्गस्य केनापि बालकेन कयापि बालिकया वा अवश्यं चोरितम्।

वन्दना – *(आहुतां प्रति)* त्वया मम नाम किमर्थं गृहीतम् ?

श्वेतपद्मा – किं तया सह युद्धं करिष्यसि ?

वन्दना – त्वया सहापि करिष्यामि।

श्वेतपद्मा – आगच्छ, आगच्छ।

आहुता – आगच्छ, अद्य दर्शयिष्यावः।

वन्दना – हुंः ! नम्रते, मया तव लेखनी चोरिता ? *(नम्रता किमपि न वदति)* न वदसि कुतः ? मौनेन सम्मतिं सूचयसि ? *(नुत्त्वा)* मया तव लेखनी चोरिता ?

नम्रता – मां न उद्वेजय। कृपया गच्छ इतः।

वन्दना – न गच्छामि चेत् किं करिष्यसि मम ? *(नुदति। नम्रता तां भूमौ पातयति।)*

आहुता – उत्तिष्ठ, उत्तिष्ठ, पुनः कलहं कुरु।

वन्दना – उहः। मया नम्रतायाः लेखनी न चोरिता। यूयं मिथ्या वदथ।

आहुता – तर्हि कुत्र गता तस्या लेखनी ?

तृतीयदृश्यम्

(वन्दनायाः माता सूचीकर्म करोति। वन्दना द्वारे खट्खटायते।)

माता – को द्वारे ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वन्दना – अहम्।

माता – उद्घाटितम्। *(वन्दना खिन्ना प्रविष्टा। माता कार्यं कुर्वती)* अद्य शीघ्रम् आगता ? खेला न अभवत् ? *(वन्दना निरुत्तरा)* किं जातम् ?

वन्दना – किमपि नहि।

माता – एवं तु कदापि न वदसि ! वद, किं जातम् ? प्रतिदिनं गृहं प्रविश्य भोजनाय माम् अस्थिरां करोषि। अद्य . . .

वन्दना – क्षुधा नास्ति।

माता – क्षुधा नास्ति ! सुष्ठु, यदा क्षुधा भवेत्, मां कथय। *(माता सूचीकर्म करोति। वन्दना दूरे उपविश्य कफणौ कष्टं नाटयति।)* कफोणिं तथा धरसि किमर्थम् ? तव कफोणौ किं जातम् ? *(वन्दना कष्टं नाटयन्ती क्रन्दति। माता ताम् उपगत्य)* वन्दने, त्वं क्रन्दसि ? दर्शय। *(कफोणिं धरति)*

वन्दना – आः *(पीडां नाटयति)* ।

माता – कफोणिं फुल्लयित्वा आगता ! किं कृतं त्वया ? *(वन्दना मातुः स्कन्धे मस्तकं स्थापयित्वा क्रन्दति।)* नहि, नहि, एवं मा क्रन्द। कथय, किं जातं तव ?

वन्दना – मातः, अहं चोरा ?

माता – त्वं चोरा ? कः कथयति ?

वन्दना – आहुता कथयति, श्वेतपद्मा कथयति। *(क्रन्दन्ती)* नम्रतायाः लेखनीं कोऽपि अनयत्। आहुता मां धरति।

माता – त्वां नम्रता किमपि अकथयत् ?

वन्दना – अहं कदापि चौर्यं करोमि ?

माता – अहं जानामि, मम पुत्री कदापि नीचकार्यं न करिष्यति। किन्तु वन्दने, मम प्रश्नस्य उत्तरं देहि। त्वां नम्रता किमपि अकथयत् ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वन्दना – सा मौनम् अधारयत्। मौनं तु सम्मतिलक्षणम्।

माता – अतस्त्वया ताभिः सह कलह आरब्धः। ततः कफोणिं फुल्लयित्वा आगता। किमर्थं चिकित्सालयं न अगच्छः ?

वन्दना – रुद्ध आसीत्। अहं किं कुर्याम् ?

माता – हे भगवन् ! किं कर्तव्यम् अधुना ?

वन्दना – किमपि कुरु मातः, बहु कष्टं भवति।

माता – हड्डं भग्नं मन्ये। यूयं किमर्थं कलहं कुरुथ ?

वन्दना – ते किमर्थम् असत्यं वदन्ति ?

माता – तत् त्वम् अध्यापिकां कथय। परिणामं पश्य। कष्टं कस्याः भवति ? कथय, किं कुर्याम् अधुना ? एकला कुत्र गच्छेयम् ?

वन्दना – उः, बहु कष्टम् !

चतुर्थदृश्यम्

(खेलात् परम् आगत्य सूक्ष्मा, सुधीः, लक्ष्मीः, अरोप्रिया, केतकी परस्परम् आलोचयन्ति।)

सूक्ष्मा – शृणु सुधि ! यद् यद् वयं विचारयामः तत्सर्वम् एकस्मिन् पत्रे लेखनीयम्। अन्यथा प्रदर्शनी-दिने अव्यवस्था भविष्यति। यदि कोऽपि किमपि विस्मरेत् ?

सुधीः – तर्हि लिख।

सूक्ष्मा – लक्ष्मीः लिखतु। अहं पत्रम्, लेखनीं ददामि। अद्य खेलेन अहम् अतीव क्लान्ता। गृहाण। *(पत्रं लेखनीं च ददाति)*

लक्ष्मीः – अद्य त्वया साधु खेलितम्। अन्यथा अस्माकं जयः न अभविष्यत्। कथय – त्वं कति पुष्पभाजनानि आनेष्यसि ?

सूक्ष्मा – अहं चत्वारि आनेष्यामि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लक्ष्मीः – सुधि, त्वम् ?

सुधीः – अहं पञ्च आनेष्यामि।

लक्ष्मीः – केतकी [कति आनेष्यति] ?

केतकी – अहं चत्वारि आनेष्यामि। किन्तु प्रदर्शनी-दिने प्रातः षड्वादने अहं पुष्पाणि आनेतुं न शक्नोमि।

अरोप्रिया – किं तस्मिन् दिने स्वप्नलोकं शोभयिष्यसि ?

केतकी – परिहासं मा कुरु। अहं षड्वादनात् पूर्वम् उत्तिष्ठामि।

अरोप्रिया – तेन किम् ? तव पुष्पाणि कः आनेष्यति ?

सुधीः – आवां भागं करिष्यावः। तस्याः अर्धं कार्यं त्वं कुरु, अर्धम् अहं करिष्यामि।

केतकी – प्रदर्शन्याः अर्थे अहम् अल्पं न करोमि।

अरोप्रिया – कः कथयति ? सर्वेषां साहाय्यं विना किमपि साधु कार्यं न सम्भवति। *(अर्पितः, सोऽहम्, राहुलः प्रविशन्ति।)*

सुधीः – *(मन्दम्)* लक्ष्मि, पश्य।

लक्ष्मीः – हे ! एते प्रदर्शन्यां किं कुर्वन्ति ?

सुधीः – सूचनाफलके एषां नाम एव नास्ति। एते किं करिष्यन्ति ?

लक्ष्मीः – एतेभ्यः दूरे स्थातव्यम्। चलत, चलत। *(सर्वाः निर्गताः)*

अर्पितः – अद्य कति प्राप्ताः ?

सोऽहम् – द्वे।

अर्पितः – सर्वं कथं प्रचलति ?

सोऽहम् – यद् यद् वयम् इच्छामः तत्सर्वं प्राप्तुं शक्नुमः।

अर्पितः – उत्तमम्। तर्हि श्वः पुनर् मिलामः। अत्र, अस्मिन् समये।

सोऽहम् – अस्तु।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चमदृश्यम्

(औषधनिर्माणं भवति। वैद्यस्य सचिवः शाश्वतः निरीक्षते। वृद्धः वैद्यः खट्वायाम् उपविश्य तालपत्रं पठति, वनस्पतिं पश्यति।)

शाश्वतः – *(औषधं दृष्ट्वा घ्रात्वा च)* किञ्चित् अधिकं कुट्टय। *(अन्यस्य दृष्ट्वा घ्रात्वा च)* किं कृतं त्वया ? अधिकं चूर्णय। हे, शीघ्रं शीघ्रं कुरु। आलस्यं गृहे त्यक्त्वा आगच्छ।

सेविका – आर्य, समयो जातः ! श्वः। *(उत्थाय कुट्टनकं गृहीत्वा गच्छति)*

शाश्वतः – यथास्थानं सम्यक् स्थापयित्वा गच्छ।

वैद्यः – शाश्वत, पश्य, कोऽपि आगच्छति न वा ?

शाश्वतः – आर्य, कोऽपि न आगच्छति। आश्चर्यम् ! अद्यत्वे रोगः न भवति ?

वैद्यः – भवति, भवति। शाश्वत, कुतस्त्वम् एवं वदसि ?

शाश्वतः – कुत्र ? एकोऽपि रोगी न आगच्छति ! दिनत्रयात् कोऽपि न आगतः !

वैद्यः – किं कर्तव्यम् ? भाग्यदोषः। त्वया लक्षितं न वा–प्रतिवेशि-ग्रामे दातव्य-चिकित्सालयस्य उद्घाटनात् परम् अस्माकम् एषा दुर्दशा।

शाश्वतः – आम् आर्य ! मया श्रुतम् – नाम्ना स दातव्य-चिकित्सालयः। औषधं तत्र न प्राप्यते।

वैद्यः – तर्हि ?

शाश्वतः – द्राक्तरस्य श्यालः चिकित्सालयस्य सम्मुखे औषधापणम् उद्घाटितवान्। रोगिणस्तत्र औषधं क्रीणन्ति।

वैद्यः – बोधसि, इदमस्ति कर्मसु कौशलम्।

शाश्वतः – आम् आर्य, बोधामि। आर्य, कापि आगच्छति।

वैद्यः – आगच्छति ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शाश्वतः – आम् आर्य, विजयस्य पुत्री स्वमात्रा सह आगच्छति।

वैद्यः – किम्, विजयस्य पुत्री ! सा उद्दण्डा बालिका !

शाश्वतः – अद्यत्वे बालकाः, बालिकाः सर्वे उद्दण्डाः। घोरकलिः, घोरकलिः !

वैद्यः – एकदा सा आवयोः उपहासम् अकरोत्।

शाश्वतः – तत् सम्यक् स्मरामि आर्य ! मम हड्डं ज्वलति। एषा नृत्यन्ती, हसन्ती, गायन्ती, कूर्दनं कुर्वती अवदत् –

वैद्यराज नमस्तुभ्यं यमराज-सहोदर ।
यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च ॥

वैद्यः – असत्यम्, अतथ्यम्, कपोलकल्पितम् एतत् ! वैद्यः प्राणान् हर्तुं शक्नोति ! वैद्यः धनानि अपहर्तुं पारयति ! असम्भवम्। वैद्यकशास्त्रस्य विरुद्धम् एतत्।

शाश्वतः – किन्तु बालकाः सुखेन गायन्ति। वस्तुतः बालकानां को दोषः। यथा शिक्षकाः शिक्षयन्ति तथा बालकाः शिक्षन्ते। अद्यत्वे सर्वं नष्टम्, भ्रष्टम्। यथा शिक्षकाः तथा छात्राः। घोरकलिः,घोरकलिः !

वैद्यः – मुञ्च तद्। आक्रोशेन को लाभः ?

शाश्वतः – भवान् भद्रः, सज्जनः। भवान् सोढुं शक्नोति। अहं न शक्नोमि।

वैद्यः – लघुबालकाः अज्ञानेन यत् कथयन्ति तत् अस्माभिः न धर्तव्यम्। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

शाश्वतः – ते अस्माकम् उपहासं कुर्वन्तु। अस्माभिः आत्मा द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, निदिध्यासितव्यः ! एष न्यायः ? *(वन्दनायाः माता आगत्य वैद्यराजं प्रणमति ।)* किम् आर्ये ! अत्र श्रीमत्याः हठात् आविर्भावः ! मार्गो विस्मृतः किम् ? एष दातव्य-चिकित्सालयः नास्ति।

वैद्यः – भद्रे, आयुर्वेदस्य प्रथमपाठः पथ्यम्, तत्परम् औषधम्। यदि पथ्यं न सेवसे तर्हि औषधं कार्यं न करिष्यति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शाश्वतः – बोधसि ? यदि अपथ्यं सेवितुम् इच्छसि, यदि स्वास्थ्यकर-नियमान् विस्मर्तुम् इच्छसि, यदि देहमन्दिरे अतिथिव्याधेः सतत-सत्कारेण आत्मानं धन्यं सुधन्यं कर्तुम् इच्छसि तर्हि कृपया इतः निवर्तस्व। अद्यत्वे औषधस्य मूल्यम् अत्यधिकम्। व्ययं करिष्यसि, रोगः न गमिष्यति।

माता – आर्य, निरुपाया अहम्। पुत्र्याः बहु कष्टं भवति।

शाश्वतः – ममापि अल्पं कष्टं न भवति। त्वं जानासि न वा – एषा तव सुपुत्री अन्यैः बालकैः सह मिलित्वा अस्माकम् उपहासं सुखेन करोति।

माता – कदा ? कदा एषा अकरोत् ?

शाश्वतः – घोरकलिः, घोरकलिः !

माता – *(वैद्यं प्रति)* आर्य, प्रार्थनां करोमि। एकवारं क्षाम्यतु। एषा पुनर्न करिष्यति। अस्याः कफोणिं पश्यतु आर्य ! हड्डं भग्नं मन्ये।

वैद्यः – हड्डं भग्नम् ! दर्शय, दर्शय। *(वन्दना दर्शयति)* कथं हड्डं भग्नम् ?

वन्दना – अपतम् ।

शाश्वतः – साधु कृतम्। पतनम् आवश्यकम्। पतनं विना जनाः न शिक्षन्ते। घोरकलिः, घोरकलिः !

वैद्यः – काशिके, सन्धिलेपम् आनय। *(वैद्यस्य पौत्री काशिका सन्धि-लेपम् आनीय वन्दनायाः कफोणौ लिम्पति। वन्दना पीडां नाटयति।)*

वैद्यः – कार्यं समाप्तम्। फलम् अचिरं प्राप्स्यसि। वत्से, कथम् अनुभवसि ? साधु ?

वन्दना – *(हसन्ती)* आम् आर्य !

माता – धन्यवादाः। कियत् दातव्यम् ?

शाश्वतः – द्विशतं रूप्यकाणि।

माता – *(प्रसेवं पश्यन्ती)* द्विशतम् . . .

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शाश्वतः – द्राक्तरः अस्मात् अल्पं न ग्रहीष्यति। क्ष-रश्मिपरीक्षा, एषा परीक्षा, सा परीक्षा, औषधम्, गमनागमन-व्ययः – सर्वं चिन्तय।

माता – बोधामि आर्य ! किन्तु मम सकाशे . . .

वैद्यः – यावद् अस्ति, यावद् दातुं शक्नोषि, देहि। चिन्ता कुतः ?

शाश्वतः – पुत्रीं भद्रताम्, शालीनताम्, शिष्टाचारं शिक्षय। आधुनिक-विद्यालयस्य पाठ्यक्रमे एतत्सर्वं नास्ति। घोरकलिः, घोरकलिः !

वन्दना – क्षाम्यतु आर्य ! पुनर्न करिष्यामि।

शाश्वतः – क्षमेय ?

वैद्यः – अरे क्षमस्व। वराक्या बहु कष्टं प्राप्तम्।

शाश्वतः– अस्तु, भवतः कथनेन क्षान्तम्। *(वन्दना प्रसन्ना)* पश्य, पुत्र्याः प्रसन्न-मधुरं मुखमण्डलं पश्य।

माता – अनुगृहीतास्मि।

शाश्वतः – तिष्ठ किञ्चित् ! पञ्ज्यां नामधामादि लेखनीयम्। *(लेखनाय लेखनीं ग्रहीतुम् उद्यतः। लेखनीं न प्राप्य)* लेखनी ? लेखनी ? लेखनी कुत्र ? आर्य, लेखनी ?

वैद्यः – लेखनीजपं किमर्थं करोषि ? तत्रैव अस्ति। *(वन्दनां प्रति)* गच्छ। अम्लं न खाद। *(वन्दना तस्याः माता च निर्गते।)*

शाश्वतः – कुत्र ? कुत्रापि न प्राप्नोमि।

वैद्यः – हरे हरे ! सम्यक् पश्य किञ्चित् ।

शाश्वतः – नहि आर्य ! अत्र नास्ति। किन्तु एषा कस्य लेखनी ? एषा कथम् अत्र आगता ? *(वैद्यं दर्शयति)*

वैद्यः – एषा तु अस्माकं नास्ति। *(दुःखेन)* सा मम पितुः, पितुः, पितुः लेखनी आसीत्। कस्ताम् अनयत् ?

शाश्वतः – कः एताम् आधुनिक-लेखनीम् अत्र अस्थापयत् ? साधारण-चोरस्तु एवं न कुर्यात् !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पत्रवाहकः – प्रेषः।

शाश्वतः – *(पत्रं गृहीत्वा पठति)* "चिन्तां मा करोतु। भवतः लेखनीम् अचिरं प्रतिदास्यामः।" कः एष भद्रचोरः ?

वैद्यः – कः ?

षष्ठदृश्यम्

(पाठवर्गः। एकाग्रता भवति। विलम्बेन आगता आहुता द्वारे तिष्ठति।)

शिक्षिका – अस्तु। *(एकाग्रता समाप्ता)*

आहुता – आर्ये, प्रवेशं प्रार्थये।

शिक्षिका – आहुते, पुनर् विलम्बः ? आगच्छ।

नम्रता – आर्ये, एषा लेखनी मम स्योते आसीत्। एषा अस्माकं कस्यापि नास्ति। किं कुर्याम् ?

शिक्षिका – त्वया स्वलेखनी प्राप्ता ?

नम्रता – नहि।

शिक्षिका – तदा त्वमेव रक्ष।

वन्दना – आर्ये, मम असाधु-लेखनीं गृहीत्वा केनापि एषा साधु-लेखनी मम स्योते स्थापिता।

आहुता – आर्ये, शिल्पायाः लेखनी अपि इत्थमेव चोरिता।

नम्रता – भास्करस्य, रवेः, शान्तनोः लेखनी अपि चोरिता।

आहुता – कः इत्थं चोरयति ?

शिक्षिका – कः इत्थं परिवर्तयति इति कथनीयम्। वस्तुतः इदं चौर्यं नास्ति। अयमस्ति विनिमयः। कोऽपि एकां लेखनीं ददाति, अन्यां गृह्णाति। अयं विनिमयः न तु चौर्यम्। अस्तु, कथयत – विनिमय-शब्दः कथं निर्मितः ? अस्य शब्दस्य कः धातुः, कः प्रत्ययः, कः उपसर्गः ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नम्रता – वि उपसर्गः, नि उपसर्गः, मय् धातुः, अ प्रत्ययः।

अर्पितः – नहि, अय्-स्थाने ई भवति। अतः मी धातुः।

शिक्षिका – साधु। वि उपसर्गः, नि उपसर्गः, मी धातुः, अ प्रत्ययः। *(कृष्णफलके लिखति)* वि+नि+मी+अ।

केतकी – एतत् तु गणितवत् अस्ति !

शिक्षिका – अस्मात् कारणात् संस्कृतभाषा पृथिव्यां सर्वत्र समानं प्रचलति। यदि त्वं स्वर्गं गच्छसि, तत्रापि समानं श्रोष्यसि। किन्तु अस्माकं भाषाः तथा न सन्ति।

केतकी – कथम् ? एकम् उदाहरणं ददातु।

शिक्षिका – शृणुत। पुदुच्चेरी एकं लघु राज्यम्। तस्मिन् लघुराज्ये अपि तमिळ् भाषा सर्वत्र न समाना। तत्र शिक्षितानां तमिळ् भिन्ना, अशिक्षितानां तमिळ् भिन्ना, मत्स्यजीविनां तमिळ् भिन्ना, आश्रम-वासिनां तमिळ् भिन्ना।

केतकी – एवम् !

शिक्षिका – इयमेव दशा सर्वासां प्रादेशिक-भाषाणाम्। स्वप्रदेशे एकप्रान्तस्य जनः अन्यप्रान्तस्य भाषां बोद्धुं न शक्नोति।

केतकी – तर्हि ?

शिक्षिका – यदि प्रादेशिक-भाषाणाम् इयमेव दुर्दशा तर्हि कापि प्रादेशिक-भाषा अखिल-भारतीया सर्वसाधारण-भाषा कथं भवितुं शक्नोति ? यदि भवति, जानासि, अस्माभिः कियत् स्मरणीयम् ? तत्तुलनया संस्कृतम् अतीव, अतीव सरलम्। अस्तु। गतवारस्य पाठम् आलोचयाम। यूयं प्रत्यय-गानं जानीथ ?

सर्वे – आम् आर्ये, जानीमः। साधु अस्ति।

शिक्षिका – अतीव आवश्यकम् अपि अस्ति। यः प्रत्ययानां प्रयोगं सम्यक् जानाति, स संस्कृतं शुद्धम् अनायासं च वदितुं शक्नोति। गायत।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्यय-गानम्

आ या इन ना
ए ऐ आय ने
आः याः अः नः उः
इ आम् याम् औ नि ॥ १॥

आभ्याम् योः नोः ओः
ऐः भिः एभ्यः भ्यः
आम् नाम् सु एषु ॥ २॥

केतकी – आर्ये, आ, या, इन, ना इत्यादि किम् अस्ति ?

शिक्षिका – त्वं पञ्च दिनानि कुत्र आसीः ? किमर्थं न आगता ? अस्मिन् वर्षे विद्यालयं प्रविश्य वारं वारम् अनुपस्थिता भवसि चेत्, कथं बोधिष्यसि ?

केतकी – अस्वस्था आसम्।

शिक्षिका – युष्मासु कः एतद् बोधयितुं शक्नोति ?

नम्रता – आर्ये, अहम्।

शिक्षिका – अत्र आगच्छ।

नम्रता – आङ्ग्लभाषया कथयानि ?

शिक्षिका – कथय। आङ्ग्लविद्यालये पठित्वा आगता एषा आङ्ग्लभाषया शीघ्रं बोधिष्यति। अन्यथा युष्माकं समयनाशः।

नम्रता – Listen. आ, या, इन, ना etc. are suffixes. They are used to convey the meaning of the prepositions by, for, from, in etc. For example, मुनिना means by the sage. Similarly, साधु – साधुना । We must know these suffixes if we want to understand what we read.

शिक्षिका – साधु। धन्यवादाः। *(केतकीं प्रति)* बोधसि ?

केतकी – आम् आर्ये !

शिक्षिका – यदि त्वम् एषां प्रत्ययानां प्रयोगं जानासि तर्हि त्वया शब्दरूपाणि न रटनीयानि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केतकी – शब्दरूपाणि न रटनीयानि ?

शिक्षिका – नैव। यथा धातुरूपाणि न रटनीयानि तथा शब्दरूपाणि अपि न रटनीयानि। यदि कोऽपि रटति तर्हि स संस्कृतं वदितुं न शक्नोति।

केतकी – कथम् ?

शिक्षिका – पश्य, अभिजित्, नम्रता, स्वातिः, रविः, भास्करः, देवकी, शान्तनुः – एते तव मित्राणि। त्वं जन्मदिने एतेभ्यः मिष्टान्नं ददासि। नैवम् ?

केतकी – आम् आर्ये, किन्तु तेन किम् ?

शिक्षिका – अधुना त्वं संस्कृते शीघ्रं कथय – On my birthday I give sweets to my neighbour अभिजित्, to my dearest friend नम्रता and to स्वाति, रवि, भास्कर, देवकी and शान्तनु। शीघ्रं कथय।

केतकी – आर्ये, एषा कथयामि।

शिक्षिका – कथय। शीघ्रम्।

केतकी – Neighbour इति संस्कृते प्रतिवेशी। प्रतिवेशी प्रतिवेशिनौ प्रतिवेशिनः प्रतिवेशिनम् . . .

शिक्षिका – किम्, जपं करोषि ?

केतकी – नहि आर्ये, रूपाणि स्मरामि।

शिक्षिका – त्वं प्रतिवेशिन्-शब्दस्य चतुर्थीविभक्तेः एकवचन-रूपम् इच्छसि। नैवम् ?

केतकी – आम् आर्ये !

शिक्षिका – तर्हि प्रथमाविभक्तेः एकवचन-रूपात् स्मरसि किमर्थम् ? तत्कालं चतुर्थीविभक्तेः एकवचन-रूपं कथय।

केतकी – तथा कर्तुं न शक्नोमि।

शिक्षिका – पश्य, एते कथं कुर्वन्ति। आहुते, त्वं कथय।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आहुता – जन्मदिने अहं स्वप्रतिवेशिने अभिजिते, स्वप्रियतम-सख्यै नम्रतायै, स्वात्यै, रवये, भास्कराय, देवक्यै शान्तनवे च मिष्टान्नं ददामि।

शिक्षिका – साधु। *(केतकीं प्रति)* इत्थं त्वमपि शीघ्रं वदितुं शक्नोषि। प्रत्यय-गानं कुरु। अत्र तव सखीषु कामपि पृच्छ, सा प्रत्ययानां प्रयोगं बोधयिष्यति। यदि न बोधसि, मां पृच्छ। *(घण्टा वाद्यते)* पुनर्दर्शनाय।

सर्वे – पुनर्दर्शनाय आर्ये !

सप्तमदृश्यम्

(नम्रतायाः पिता बधिरः। सर्वकारीय-कार्यालये सः मुख्यलिपिकः। कार्यालये कार्यं समाप्य सः गृहं प्रविशति। कर्णे श्रवणयन्त्रं दृश्यते। गुण्डुरामः तस्य सेवकः।)

पिता – गुण्डुराम !

गुण्डुरामः – आम् आर्य ! *(गुण्डुरामः पानिलम्, एकस्यां स्थालिकायां किञ्चित् मिष्टान्नम् आनीय पटले स्थापयित्वा यावत् गच्छति तावत् पिता अभ्यन्तरे श्रवणयन्त्रम् अवमोच्य आगच्छति, उपधौ उपविश्य किञ्चित् मिष्टान्नं खादित्वा जलं पिबति।)*

पिता – गुण्डुराम !

गुण्डुरामः – आम् आर्य !

पिता – नम्रता विद्यालयात् आगता ?

गुण्डुरामः – नहि आर्य !

पिता – किं जातम् ? कुतः अधुनावधि न आगता ? गुण्डुराम !

गुण्डुरामः – आम् आर्य !

पिता – चायं कदा आनयसि ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुण्डुरामः – एष आगच्छामि आर्य !

पिता – एँ! आगच्छसि ? आगच्छ, सुखेन आगच्छ, महाराजवत् आगच्छ। पाषण्डः । कार्यालये अष्टहोराणां परिश्रमात् परं यदि समये किञ्चित् चायः न प्राप्यते तर्हि कस्य मनः क्षुब्धं न भवेत् ? एँ! कस्य कण्ठः चीत्कारं न कुर्यात् ? एँ, एँ! किं कर्तव्यम् ? सेवकाश्रितानां भाग्यमेव ईदृशम्। स्वेच्छया किमपि कर्तुं न शक्यते। *(पटलस्थं नस्तिनं दर्शयन्)* एतत् नस्ति-कार्यम् ! एतत् नस्तिकार्यम् अपि मम मस्तकं नाशयति। कार्यालये, गृहे, कियत् कर्तव्यम् ! धत् ! *(पटले नस्तिनं क्षिपति। ततः लेखनीं दृष्ट्वा)* एतत् किम् ? पत्रम् ! *(लेखन्यां लग्नं पत्रं पठति।)* "चिन्तां मा करोतु। भवतः लेखनीम् अचिरं प्रतिदास्यामः।" *(उच्चैः)* गुण्डुराम !

गुण्डुरामः – आम् आर्य !

पिता – अत्र आगच्छ। शीघ्रम्। *(त्वरया आगतं गुण्डुरामम्)* मम लेखनी, मम लेखनी कुत्र ?

गुण्डुरामः – एषा।

पिता – अन्धोऽसि किम् ? पश्य, सम्यक् पश्य। एषा मम लेखनी ?

गुण्डुरामः – एषा तु अस्माकं नास्ति !

पिता – त्वं गृहे असि। कोऽपि आगत्य लेखनीं परिवर्त्य गच्छति। त्वं ज्ञातुं न शक्नोषि ?

गुण्डुरामः – आर्य, अहं किञ्चित्कालाय . . .

पिता – तूष्णीम्। गच्छ इतः। *(वन्दनायाः माता प्रविष्टा। तां प्रति)* का त्वम् ?

माता – अहं वन्दनायाः माता।

पिता – किम् ? त्वं वन्दनायां जाता ? जटिलं वदसि किमर्थम् ? स्पष्टं कथय – अहं वन्दनायाः पुत्री।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माता – नहि। वन्दना मम पुत्री।

पिता – ओऽ ! वन्दना तव पौत्री ! किन्तु, किन्तु मातामहीवत् त्वं नैव दृश्यसे। मन्ये, बाल्यविवाहः कृतः ।

माता – एष वधिरः ! *(कोपं नाटयति)*

पिता – आम्, अहं विधुरः। त्वम् अद्य जानासि ? गतवर्षात् नम्रतायाः माता मां त्यक्त्वा स्वर्गे वसति।

गुण्डुरामः – आर्य, चायः। *(नम्रतायाः पिता चायं पिबति। गुण्डुरामः निष्क्रान्तः।)*

पिता – कथय, अत्र तव किं कार्यम् ? त्वं किम् इच्छसि ?

माता – नम्रता विद्यालयात् आगता ?

पिता – आहता ? नम्रता आहता ?

माता – तन्नास्ति आर्य !

पिता – नस्तिकार्यं परम्। कार्यालयम् आगच्छ। गुण्डुराम !

गुण्डुरामः – आम् आर्य !

पिता – नम्रता आहता। अहं गच्छामि। *(वन्दनायाः मातरं प्रति)* त्वं कार्यालयम् आगच्छ। *(निर्गतः)*

गुण्डुरामः – *(प्रविश्य)* आर्ये ! भवती किम् अकथयत् ? आर्यः किमपि न खादित्वा गतः।

माता – तव आर्य एकः घण्टाकर्णः। अहं कथयामि एकम्, स बोधति अन्यत्।

गुण्डुरामः – उच्चैः कथनीयम्। भवती किम् अकथयत् ?

माता – अहं पृच्छामि – नम्रता आगता ? स बोधति – नम्रता आहता ! अहं कथयामि – नास्ति। स बोधति – नस्ती !

गुण्डुरामः – नस्ती इति किम् ?

माता – नस्ती इति एतत् *(पटलस्थं file दर्शयति)*।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुण्डुरामः – ओऽ, मम स्वामी fileकार्यं बहु करोति। तस्मात् तस्य मनः तदेव चिन्तयति।

माता – तव बधिर-स्वामिनं कथय – सः निजपुत्रीं नियन्त्रयेत्।

गुण्डुरामः – किं जातम् ? नम्रता किम् अकरोत् ?

माता – नम्रता मम पुत्र्याः कफोणिहड्डम् अभञ्जयत्।

गुण्डुरामः – एवम् !

माता – मया वैद्याय शतं रूप्यकाणि दत्तानि। पुनः शतं दातव्यम्। विद्यालये प्रधानशिक्षिकायै सर्वं कथितम्।

गुण्डुरामः – हे भगवन् ! तदा किं भवेत् ?

माता – तव स्वामिनं कथय – यदि नम्रता पुनः मम पुत्र्याः किमपि कुर्यात्, अहं न्यायालयं गमिष्यामि। *(निर्गता)*

गुण्डुरामः – आर्ये, शृणोतु। चायपानं कृत्वा गच्छतु। अरे ! गता ?

अष्टमदृश्यम्

पत्रवाहकः – *(दूरात् दृष्ट्वा)* वैद्यराज !

वैद्यः – कः ?

शाश्वतः – पत्रवाहकः। तत्र।

पत्रवाहकः – भाग्येन भवान् मार्गे मिलितः। भवतः धनम् आगतम्।

वैद्यः – धनम् !

पत्रवाहकः – शतं रूप्यकाणि। अत्र हस्ताक्षरं करोतु। *(वैद्यः हस्ताक्षरं करोति।)* अत्रापि।

पत्रवाहकः – गृह्णातु शतं रूप्यकाणि। *(धनं धनप्रेष-पर्णिकां च ददाति।)*

वैद्यः – धन्यवादाः। *(धनप्रेष-पर्णिकां पठितुम् अशक्तः शाश्वताय ददाति।)*

शाश्वतः – "वन्दनायाः औषधस्य अवशिष्टं मूल्यं प्रेषयामि। सा पूर्णतः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वस्था। धन्यवादाः।" भाग्येन तया प्रेषितम्। मम विश्वासः न आसीत्। *(द्वौ अग्रे सरतः।)*

शाश्वतः – आर्य, सावधानम्।

वैद्यः – किमर्थम् ?

शाश्वतः – पश्यतु। अग्रे दुष्टानां दलम्।

वैद्यः – त्वं किमपि न वद। शान्तम् आगच्छ।

शाश्वतः – यदि ते किमपि वदिष्यन्ति, अद्य अहं शान्तं न स्थास्यामि। मम हड्डं ज्वलति। *(सुधीः, वन्दना, रविः प्रविश्य प्रणमन्ति।)*

सुधीः – आर्य, अस्माकं विद्यालयस्य स्वर्णजयन्तीम् उपलक्ष्य विद्यालये वयम् एकां प्रदर्शनीं कुर्मः। शिक्षामन्त्री अस्माकं प्रदर्शनीम् उद्घाटयितुम् आगच्छति।

कृपा – वयं भवन्तं सपरिवारम्, सबन्धुवर्गम्, सादरं निमन्त्रयामः।

सुधीः – कृपया सर्वे आगच्छन्तु।

वैद्यः – आगमिष्यामः, अवश्यम् आगमिष्यामः। *(वन्दनां प्रति)* वत्से, कन्यके, मातरं कथय – तया धनप्रेषेण प्रेषितानि शतं रूप्यकाणि मया अधुनैव किञ्चित्कालपूर्वं प्राप्तानि।

वन्दना – *(स्वगतम्)* शतं रूप्यकाणि मात्रा धनप्रेषेण प्रेषितानि ? सा तु प्रेषालयं कदापि न गच्छति !

वैद्यः – किं चिन्तयसि ? अपि त्वं स्वस्था ?

वन्दना – आम् आर्य ! अहं पूर्णतः स्वस्था। धन्यवादाः।

वैद्यः – स्वस्ति, स्वस्ति। *(अपवार्य)* अरे शाश्वत !

शाश्वतः – आम् आर्य !

वैद्यः – अस्याः बालिकायाः चरित्रे परिवर्तनं न पश्यसि ?

शाश्वतः – आम् आर्य, पश्यामि। मया कथितम् – पतनं विना ज्ञानं न भवति। पतनं साधकम् आर्य ! पतनम् आवश्यकम्। *(द्वौ निर्गच्छतः)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वन्दना – युष्मासु कः वैद्यसकाशं शतं रूप्यकाणि धनप्रेषेण प्रैषयत्? कः? कः स सदिच्छु-महात्मा?

रविः – तेन तव किं गच्छति? धनं नम्रतायाः पित्रा प्रेषितं स्यात्!

वन्दना – नम्रतायाः पित्रा प्रेषितं स्यात्? यूयं मिथ्या वदथ। इदं युष्माकं पौरुषम्? यूयं मम मातरं जानीथ?

रविः – सम्यक् जानीमः। स्नेहमयी सा न केवलं तव, सा अस्माकम् अपि आत्मीया जननी।

वन्दना – तस्या निकटे यूयं मिथ्या वदिष्यथ? *(आगच्छन्तम् अर्पितं प्रति)* अर्पित, इदं तव कार्यं नास्ति?

अर्पितः – किं कार्यम्?

वन्दना – त्वया वैद्यसकाशं धनप्रेषेण शतं रूप्यकाणि न प्रेषितानि?

अर्पितः – शतं रूप्यकाणि?

वन्दना – त्वं मिथ्या वदसि?

अर्पितः – वन्दने, प्रदर्शन्याः परदिने वयं तव मातरं सर्वं कथयिष्यामः। कृपया चल। निमन्त्रण-पत्राणि बहुभ्यः दातव्यानि।

वन्दना – यूयं मां छलयिष्यथ? अहं युष्माकं नाडीं जानामि।

नवमदृश्यम्

(विद्यालयस्य प्रधानशिक्षिका शिक्षामन्त्रिणे बहुमूल्यं शालम् उपहृत्य तम् उपधौ उपवेशयति। नर्तिकाः नृत्यन्ति।)

स्वागतं सुस्वागतम् सादरं सुस्वागतम्
हार्दिकं सुस्वागतम् स्वागतं सुस्वागतम् ॥ १॥
कुर्वन्त्वत्र पदार्पणम् दीयतां शुभदर्शनम्
अग्रगण्य-वरेण्या ब्रूमहे वः स्वागतम् ॥ २॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वन्दनम् अभिनन्दनम् कुर्महे अभिवादनम्
श्रीमतां शुभकामना प्रेरयेत् नः सन्ततम् ॥ ३॥

(शिक्षामन्त्री पटं (ribbon) कृत्वा प्रदर्शनीम् उद्घाटयति। सर्वे प्रदर्शनीं द्रष्टुं प्रविशन्ति।)

दशमदृश्यम्

केतकी – प्रदर्शनी चित्ताकर्षिका अस्ति !

स्वर्णलता – लघु-लघु-बालकैः किं किं न संगृहीतम् ! अद्भुतम् ! मह्यं बालिकानां सूचीकर्म अतीव रोचते।

केतकी – लेखनीप्रदर्शनी मह्यं रोचते।

स्वर्णलता – आम्, कतिविधा लेखन्यः सन्ति ! आदिकालात् अधुनापर्यन्तं देशीयाः, विदेशीयाः कतिप्रकारा लेखन्यः !

आहुता – आर्ये, वन्दनायाः लेखनी तत्र अस्ति।

श्वेतपद्मा – ममापि अस्ति। आर्ये, आगच्छतु।

आहुता – आम् आर्ये, आगच्छतु। चोरं धरिष्यामः।

शिक्षिका – केन आधारेण चोरं धरिष्यसि ? किं प्रमाणं तव ? किं लेखनीनिर्माणी तव अर्थे एकाम् एव लेखनीम् अकरोत् ? आगच्छत।

आहुता – *(श्वेतपद्मां प्रति)* कथय, प्रथम-पुरस्कारं कः प्राप्स्यति ?

श्वेतपद्मा – प्रथम-पुरस्कारं पुष्पप्रदर्शनी प्राप्स्यति।

आहुता – नहि, सूचीकर्म प्राप्स्यति।

श्वेतपद्मा – यदि न प्राप्नुयात् ?

आहुता – यदि प्राप्नुयात् ? त्वं किं दास्यसि ?

श्वेतपद्मा – यदि न प्राप्नुयात् ? त्वं किं दास्यसि ?

शिक्षिका – इश्श् ! शान्तम् आगच्छत। अधुना सभा भविष्यति। सभायां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नीरवम् उपविशत। यदा अहं करतालं वादयिष्यामि तदा युष्माभिः वादनीयम्। अन्यथा कोऽपि शब्दं न कुर्यात्। अवगतम् ?

सर्वे – आम् आर्ये ! *(निर्गच्छन्ति)*

नम्रता – पितः, प्रदर्शन्यां मम लेखनी अस्ति। त्वं कुतः न शृणोषि ?

पिता – अहं सम्यक् शृणोमि पुत्रि ! मम लेखनी अपि तत्र अस्ति। किन्तु प्रमाणम् ? मुञ्च तत्। यद् गतं तस्य चिन्तां मा कुरु।

शाश्वतः – आर्य, भवतः पितुः पितुः पितुः काष्ठलेखनी प्रदर्शन्याम् अस्ति।

वैद्यः – किन्तु प्रमाणं कुत्र अस्ति ?

शाश्वतः – आम्, प्रमाणं तु नास्ति !

वैद्यः – अरे शाश्वत !

शाश्वतः – आम् आर्य !

वैद्यः – स भद्रपरिवारस्य बालकः चौर्यं कर्तुं शक्नोति ?

शाश्वतः – आर्य, अद्यत्वे सर्वं सम्भवति। घोरकलिः, घोरकलिः !

वैद्यः – दुर्भाग्यम् !

एकादशदृश्यम्

(रक्षिपुरुषाः सभास्थलं जनान् च परीक्षन्ते। प्रधानशिक्षिकया सह शिक्षामन्त्री प्रविशति। शिक्षामन्त्रिणः पृष्ठतः तस्य अङ्गरक्षकः आगच्छति। एकः रक्षिपुरुषः वितन्तुक-यन्त्रेण वदति।)

रक्षिपुरुषः – Hellow ! Yes. We have thoroughly checked. There is no bomb here. Pardon ! Human bomb ? No, no. We are checking everybody. Tree ! O, Bakul tree ! We have searched from top to bottom. Hellow ! The minister is going to stay here only for fifteen minutes. O.K. ? Over.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रधानशिक्षिका – नमः सदसे।

मान्यवर शिक्षामन्त्रिमहोदय, उपस्थित सभासद्गण, प्रिय सहकर्मि-वृन्द, श्रद्धेयाः छात्राः !

अस्माकं विद्यालयस्य स्वर्णजयन्ती-महोत्सवे भवतां सर्वेषां सादरं स्वागतम्। अस्मिन् महोत्सवे मान्यवर-शिक्षामन्त्रि-महोदयम् अतिथिरूपेण प्राप्य वयं धन्यताम् अनुभवामः। मन्त्रिमहोदयः अस्माकं राज्यस्य वरिष्ठः शिक्षावित्, सुख्यातः लेखकः, कविः, भारतीयसंस्कृतौ संस्कृतभाषायां च महान् अनुरागी। भवद्भिः अत्र या प्रदर्शनी दृष्टा तस्याः उद्घाटनम् एतैः महोदयैः कृतम्। अधुना अहं मन्त्रिमहोदयेभ्यः निवेदयामि – ते अस्मान् अभिभाषणेन अनुगृह्णन्तु।

शिक्षामन्त्री – प्रियाः छात्राः, आचार्यमहोदयाः, पितरः, मातरः, भ्रातरः, भगिन्यः ! सर्वेभ्यः नमस्कारः।

भवतां विद्यालयस्य स्वर्णजयन्ती-महोत्सवे योगदानं कृत्वा अहम् आत्मानं गौरवान्वितं मन्ये। भवन्तः मन्ये न जानन्ति – भवतां विद्यालयेन सह अस्माकं कुलस्य सम्बन्धः मम जन्मनः पूर्वमेव वर्तते। मम पितुः ज्येष्ठभ्रातुः श्वशुरः भवतां विद्यालयस्य प्रधानः अध्यापकः आसीत्।

मम पिता भवतां विद्यालयस्य भूमिक्रयेण आर्थिकं साहाय्यम् अकरोत्। भवताम् एषः संस्कृतमाध्यमः विद्यालयः अस्माकं राज्यस्य कीर्तिम् अधिकाधिकं वर्धयतु। एषा मम कामना। *(तालिकावादनम्)*

भवताम् अस्मिन् विद्यालये केवलम् अध्ययनं अध्यापनं वा न भवति। अस्मिन् आधुनिके गुरुकुले छात्राणां चरित्रनिर्माणे प्राधान्यं दीयते। सत्यशीलता, स्पष्टवादिता, निर्भीकता, देशभक्तिः इत्यादयः गुणाः अत्रत्य-छात्रेषु स्फुटं दृश्यन्ते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मया अत्रत्या पाठनपद्धतिः दृष्टा। या संस्कृतभाषा अस्माकं छात्रजीवने व्याघ्रीवत् भयङ्करी आसीत् सा अत्रत्य-छात्रैः अनायासम्, सानन्दम्, सोत्साहं पठ्यते। अत्र मया यद् यद् दृष्टं तत्सर्वं शिक्षाधिकारिभिः सह आलोच्य संस्कृतभाषायाः विकासाय योजनामेकां करिष्यामि। भवतां विद्यालयस्य अनुदानराशिं वर्धयिष्यामि। वन्दे मातरम्। *(तालिकावादनम्)*

प्रधानशिक्षिका – शिक्षामन्त्रिमहोदयाः स्वकर्मबहुलजीवने अवकाशं कल्पयित्वा, अत्र आगत्य, याम् उदारभावनाम् अदर्शयन् तदर्थम् अहं विद्यालयपक्षतः मन्त्रिमहोदयेभ्यः गभीरां कृतज्ञतां ज्ञापयामि। *(तालिकावादनम्)* अधुना अस्य समारोहस्य अन्तिमं चरणम्। अत्र आयोजितायां प्रदर्शन्यां कृतभूरिश्रमेभ्यः यशस्वि-छात्रेभ्यः पुरस्कारान् दास्यामः। ते मन्त्रिमहोदयस्य करकमलात् पुरस्कारं गृह्णन्तु। प्रथमं सुधीम् आह्वयामि। एषा विविधपुष्पाणां भव्यां प्रदर्शनीम् अकरोत्। अस्यै तृतीय-पुरस्कारः दीयते।

(सुधीः मन्त्रिमहोदयात् पुरस्कारं गृह्णाति। भाचित्रग्राहकाः चित्रं गृह्णन्ति। मन्त्रिमहोदयः प्रादेशिक-भाषया पृच्छति।)

शिक्षामन्त्री – तव नाम सुधीः, नैवम् ?

सुधीः – आम् आर्य !

शिक्षामन्त्री – सुधीः इत्यस्य कः अर्थः ?

सुधीः – सुधीः इत्यस्य अर्थः – सुमतिः, सुबुद्धिः।

शिक्षामन्त्री – सा तव अस्ति ? *(सुधीः हसति)* सा सर्वेषां भवेत्, सर्वेषाम्। साधु-बालिका। सम्यक् पठ। *(सुधीः प्रणम्य गच्छति।)*

प्रधानशिक्षिका – द्वितीय-पुरस्कार-विजेत्री सालोमे। एषा बहुदेशीय-प्रेषालय-मुद्राङ्काणां शोभनां प्रदर्शनीम् अकरोत्। एषा द्वितीय-पुरस्कारं प्राप्नोति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिक्षामन्त्री – *(प्रादेशिक-भाषया)* त्वं संस्कृतं जानासि ?

सालोमे – आम्, जानामि।

शिक्षामन्त्री – त्वम् अत्र कतिवर्षेभ्यः संस्कृतं पठसि ?

सालोमे – अहम् अत्र वर्षद्वयात् संस्कृतं पठामि।

शिक्षामन्त्री – आश्चर्यम् ! त्वम् अस्माकं भाषाम् अपि जानासि ?

सालोमे – किञ्चित्, किञ्चित् जानामि।

शिक्षामन्त्री – अतीव साधु। सम्यक् पठ, अधिकं पठ।

प्रधानशिक्षिका – प्रथम-पुरस्कार-विजेता अर्पितः। एष लेखनीनाम् अपूर्व-प्रदर्शनीम् अकरोत्। अस्मै प्रथम-पुरस्कारः दीयते।

नम्रता – अस्माकं लेखनीं गृहीत्वा एष प्रथम-पुरस्कारं प्राप्नोति !

अर्पितः – आर्ये, किञ्चित् कथयानि ?

प्रधानशिक्षिका – कथय।

अर्पितः – मह्यं प्रथम-पुरस्कार-प्रदानाय कृतज्ञतां निवेदयामि। वस्तुतः अस्य पुरस्कारस्य अधिकारी अहम् एकलः नास्मि। यदि मम बन्धवः साहसेन तत्परतया च कार्यं न अकरिष्यन् तर्हि अहं प्रथम-पुरस्कारं न प्राप्स्यम्।

अस्माकं प्रदर्शनी सर्वेषाम् अज्ञातविषयः आसीत्। प्रदर्शन्याः उद्घाटनपर्यन्तं कोऽपि न अजानात् वयं किं कर्तुं गच्छामः इति। पूज्यप्रधानशिक्षिकायाः अनुमत्या एतत् समभवत्। अतः वयं तस्यै गभीर-कृतज्ञतां निवेदयामः।

याः लेखन्यः भवद्भिः प्रदर्शन्यां दृष्टाः तासु एकस्याः अपि क्रयः अस्माभिः न कृतः। सर्वाः लेखन्यः भवद्भिः इच्छया अनिच्छया वा प्रदत्ताः।

अनुमतिं विना लेखनीनाम् आनयनं चौर्यम् इति केचन मन्येरन्। किन्तु इदं चौर्यम् इति कथयितुं न शक्यते, यतो हि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चोरितं वस्तु कोऽपि स्वेच्छया न प्रतिददाति। वयम् अत्र सर्वाः लेखनीः प्रतिदास्यामः। असौविध्याय क्षन्तव्या वयम्। *(तालिका-वादनम्)*

प्रधानशिक्षिका – अर्पितस्य तस्य सहयोगिनां च आचरणेन अहम् अतीव अभिभूता। किमपि नूतनं कुरुत, युष्माकं वर्गः प्रथम-पुरस्कारं प्राप्नुयात् इति मया एते प्रेरिता आसन्। मम वचनं पालयितुम् एते ईदृशं कार्यं करिष्यन्ति इति मम कल्पना न आसीत्। अस्तु, यैः इदं कार्यं कृतं तेषां दुःसाहस-प्रवृत्तिं दृष्ट्वा अहं तान् महत्तरं दुःसाहसं कर्तुम् आह्वयामि। शृणुत –

उद्धरत आर्याणां चिन्तनधाराम्, अनुशासनं जीवनं च। उद्धरत वेदान्तम्, गीताम्, योगम् – न खलु बुद्धौ भावभावनासु वा, अपि तु जीवने। तान् जीवने आचरत। तदा एव यूयं महान्तः, वीर्यवन्तः, शक्तिमन्तः, दुर्जयाः, निर्भया भविष्यथ।

प्रिय छात्रगण, युष्माकं जीवनम् एषाम् आप्तवाक्यानाम् अभ्यास-भूमिर् भवतु। नमो नमः।

(आश्रमविद्यालयस्य त्रयोदशवर्षीयैः छात्रैः २६.९.९८ दिनाङ्के प्रयुक्तम्।)

सप्तमान्तरम् – seventh period. वर्गः – class. स्योतम् – bag. लिपिकः – clerk. पानिलम् – glass. पटलम् – table. नस्ती – file. धनप्रेष-पर्णिका – M.O. coupon. उपधिः – chair. भाचित्रग्राहकः – photographer.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परीक्षा

सुसायं सर्वेभ्यः ।

Tonight's play परीक्षा is based on a story from the महाभारतम् ।

In the fierce battle between the devas and the asuras the numerical strength of the devas gets steadily depleted while the strength of the asuras remains unaffected. This is because their गुरु शुक्राचार्य revives the dead by the use of the सञ्जीवनीविद्या while देवगुरु बृहस्पति is unable to do so.

Indra, on behalf of the devas, approaches बृहस्पति and requests him that his son कच be sent to शुक्राचार्य for learning the सञ्जीवनीविद्या। Will शुक्राचार्य, the staunch enemy of बृहस्पति, teach this विद्या ? Will कच succeed in his mission ?

To the modern mind, bringing a dead man back to life by a mantra may sound like a figment of the imagination. But from the Mother's writings we know that reviving the dead is not an impossibility.

The Mother knew a mantra that could bring anyone back to life, and this was only a small part of the mantra's power.

Tonight's play opens in Brihaspati's Ashram.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमदृश्यम्

(देवगुरुः बृहस्पतिः ध्यानस्थः। पृष्ठतः श्रूयते)

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

बृहस्पतिः – *(ध्यानावस्थायाम्)* देवराज इन्द्रः तथा विपन्नः !

इन्द्रः – *(प्रविश्य)* नमोऽस्तु गुरुदेव !

बृहस्पतिः – *(नेत्रे उन्मील्य)* स्वस्त्यस्तु देवराज ! अपि सर्वं कुशलम् ?

इन्द्रः – कुशलं कुत्र गुरुदेव !

बृहस्पतिः – किं जातम् ? किं पुनः आक्रमणम् ?

इन्द्रः – आम् गुरुदेव ! ह्यः असुरैः नन्दनकाननं विध्वस्तम्। ते कल्पवृक्षम् उत्पाटयितुम् ऐच्छन् . . .

बृहस्पतिः – कल्पवृक्षम् ! इयती आस्पर्धा !

इन्द्रः – आम् गुरुदेव ! कल्पवृक्षे, कामधेनौ, ऐरावत-हस्तिनि, स्वर्णरथे, कुबेरगृहे, देवकन्यासु असुराणां तीव्रा लोलुपदृष्टिः।

बृहस्पतिः – किम् एषां रक्षणे भवन्तः असमर्थाः ?

इन्द्रः – गुरुदेव, कदा भवेत् देवासुर-संग्रामस्य अवसानम् ? किं देवकुलं स्वर्गराज्यात् निश्चिह्नं भवेत् ?

बृहस्पतिः – कुत एषा दुश्चिन्ता ? अस्माकं विजयः सुनिश्चितः।

इन्द्रः – कथम् ? असुराणाम् उपद्रवेण सुखसमृद्धिपूर्णं स्वर्गराज्यं भीतम्, सन्त्रस्तम्। भयोद्विग्ना देवकन्याः मार्गे विचरितुं न शक्नुवन्ति।

बृहस्पतिः – यत्र सुखम्, भोग एव ध्येयम्, यत्र आत्मोन्नतेः मार्गः रुद्धः, तत्र दुर्गतिः, सङ्कटम् अपरिहार्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इन्द्रः – तत् साधु। अधुना किं कर्तव्यं गुरुदेव ? कृपया कमपि उपायं करोतु येन अस्माकं सङ्ख्या अल्पा न भवेत्।

बृहस्पतिः – सुरपते, सा विद्या अधुनापि नाधिगता यया अहं मृतान् जीवयितुं शक्नोमि।

इन्द्रः – असुराणां गुरुः शुक्राचार्यः कथं ताम् अजानात् ?

बृहस्पतिः – सः यथा तपस्याम् अकरोत् तथा कः कर्तुं शक्नोति ?

इन्द्रः – अस्ति, भवतः पुत्रः।

बृहस्पतिः – मम पुत्रः ?

इन्द्रः – आम् गुरुदेव ! भवतः पुत्रः कचः।

बृहस्पतिः – नहि। कचः अधुनापि बालकः।

इन्द्रः – अत एव स कर्तुं शक्नोति। कचः शुक्राचार्यस्य शिष्यो भवेत्।

बृहस्पतिः – असम्भवम्। शुक्राचार्यः मां शत्रुं मन्यते। स कथं मम पुत्रं शिक्षयेत् ?

इन्द्रः – भवान् एतत् कथयति ! यदि कोऽपि योग्यच्छात्रः समित्पाणिः कमपि गुरुम् उपगच्छेत् तर्हि गुरुः तं निराकर्तुं शक्नोति ?

बृहस्पतिः – कदापि नहि। एष गुरुकुलस्य धर्मः। तथापि कचः असुराणां मध्ये कथं तिष्ठेत् ?

इन्द्रः – विद्या-बुद्धि-विनयादि-गुणेषु कचः अद्वितीयः। स एव इदं कार्यं कर्तुं शक्नोति इति सर्वेषां देवानां मतम्।

बृहस्पतिः – *(ध्यानं कृत्वा)* यदि एवं तर्हि कचः प्रष्टव्यः।

इन्द्रः – अहं तम् आह्वयामि। मातले !

मातलिः – आज्ञापयतु देव !

इन्द्रः – कचम् आह्वय।

मातलिः – यथाज्ञा। *(निर्गतः)*

इन्द्रः – शीघ्रम् आगच्छ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बृहस्पतिः – यत् पिता कर्तुं न शक्नोति तत् पुत्रः करोति चेत्, साधु। एष गौरवस्य विषयः। देवकुलस्य रक्षणम् अस्माकं धर्मः।

कचः – *(प्रविश्य प्रणम्य च)* पितः, अहम् आहूतः ?

बृहस्पतिः – आम्, वत्स !

कचः – *(निरीक्ष्य)* भवतो मुखं गम्भीरं किमर्थम् ? किमर्थं भवतो मुखे दुश्चिन्तायाः कालिमा ? देवराजोऽपि सचिन्तः। किं कारणं पितः ?

इन्द्रः – असुराणां वारंवारम् आक्रमणेन देवसैन्यं दिनानुदिनम् अल्पं भवति।

कचः – आम्, शुक्राचार्यवत् वयं मृतान् जीवयितुं न शक्नुमः।

इन्द्रः – एतत् कार्यं त्वं कर्तुं शक्नोषि।

कचः – अहम् ?

इन्द्रः – आम्, वत्स ! देवाः इच्छन्ति – त्वं शुक्राचार्यस्य शिष्यत्वं स्वीकृत्य मृतसञ्जीवनी-विद्यां शिक्षस्व।

कचः – एवम् ! अहं तां विद्यां शिक्षिष्ये ! अहो भाग्यं मम ! आज्ञापयतु पितः ! मृतसञ्जीवनी-विद्यां शिक्षित्वा अहं देवान् उज्जीवयिष्यामि।

बृहस्पतिः – गच्छ वत्स ! पूर्णकामो भव। त्वयि अस्माभिः गुरुभारः न्यस्तः।

कचः – गुरुभारः ?

बृहस्पतिः – आम्, वत्स ! तत्र गुरुकुले तथा आचर यथा पितृकुलस्य सम्मानः, देवजातेः गौरवं वृद्धिं गच्छेत्।

कचः – मयि भवतः आस्था नास्ति ? *(क्रन्दनपरः)*

बृहस्पतिः – अस्ति वत्स ! त्वां केवलं चेतयामि। त्वं यस्मिन् परिवेशे स्थास्यसि तत्र महताम् ऋषि-मुनीनाम् अपि पतनं सम्भवति।

कचः – किन्तु भवतः आशीर्वादेन मम किमपि दुःसाध्यं न भविष्यति।

बृहस्पतिः – दुःसाध्यं साधयितुम् एव त्वं जातः। वत्स, गुरुगृहे त्वया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सत्यहृदयेन कार्यं कर्तव्यम्। गुरुदेवः शुक्राचार्यः शील-सेवा-सदाचारैः सन्तोषणीयः। गुरुसेवा तव परमधर्मः स्यात्।

कचः – करिष्यामि पितः ! *(प्रणमति)*

बृहस्पतिः – गच्छ वत्स ! शुभास्ते पन्थानः सन्तु।

इन्द्रः – *(कचं निकटम् आहूय)* शुक्राचार्यस्य पुत्र्यां देवयान्याम् अपि साधु आचर।

कचः – देवयानी ?

इन्द्रः – आम्, वत्स ! सा शुक्राचार्यस्य अनन्या, प्रियतमा पुत्री। यदि त्वं तां प्रसादयितुं शक्नोषि तर्हि तव लक्ष्यसिद्धिः सुनिश्चिता।

कचः – यतिष्ये सुरपते ! *(प्रणमति)*

इन्द्रः – वर्धस्व वत्स ! देवानाम् आशिषः त्वया सह वर्तन्ते।

द्वितीयदृश्यम्

(राजप्रासादः। राजा वृषपर्वा महामन्त्री च आलपतः।)

वृषपर्वा – अस्तु, बोधामि। किन्तु गुरुदेवाः कथं वर्तन्ते ? अपि तेषां सर्वं कुशलम् ?

महामन्त्री – आम् राजन् ! गुरुदेवानां सेवायां कापि त्रुटिर् न भवति।

वृषपर्वा – देवयान्याः ? सा कथम् अस्ति ? अपि शर्मिष्ठा तां सम्यक् पश्यति ?

महामन्त्री – आम् राजन् ! ते सहोदरीवत् सह एव तिष्ठतः, भ्रमतः, खादतः, स्वपितः।

वृषपर्वा – साधु। देवयान्याः सर्वा इच्छा तत्कालं पूरणीया। अत्र तस्याः किमपि असौविध्यं न भवेत्।

महामन्त्री – तदर्थं समुचिता व्यवस्था कृता राजन् !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृषपर्वा – राजकुमार्याः अर्थे यत् यत् क्रियते तत्सर्वं देवयान्याः अर्थेऽपि कर्तव्यम्।

महामन्त्री – कुर्मः राजन्!

वृषपर्वा – शर्मिष्ठा, देवयानी – इमे द्वे मम द्वे नेत्रे।

महामन्त्री – देवयान्याः स्वच्छन्द-विहाराय अस्माकं प्रासादः उन्मुक्तः।

वृषपर्वा – एतद् नैव विस्मर्तव्यम् – गुरुदेवस्य आशीर्वादैः वयं जीवामः। अन्यथा असुरजातेः अस्तित्वं कदा लुप्तम् अभविष्यत्। बुद्धौ, पराक्रमे देवाः किम् अस्मत् न्यूनाः?

महामन्त्री – नहि राजन्! गुरुदेवस्य कूटनीत्या देवानां दौरात्म्यं दूरीभूतम्। गुरुदेवस्य साहाय्येन देवानां पराजयः वारंवारं भवति।

वृषपर्वा – आम् महामन्त्रिन्! गुरुदेवस्य कृपया अस्माकं राज्यं धनधान्यैः परिपूर्णम्। प्रजागणः सुप्रसन्नः। कुत्रापि अभावस्य चिह्नं नास्ति। गुरुदेवस्य कृपया स्वर्गपुरम् अचिराद् अस्मदीयं भविष्यति!

प्रहरी – विजयतां राजन्! गुरुदेव-शुक्राचार्यः भवन्तं द्रष्टुकामः।

वृषपर्वा – सादरम्, ससम्मानं प्रवेशय। *(स्वगतम्)* अधुना गुरुदेवस्य आगमनम्? *(शुक्राचार्यं दृष्ट्वा)* नमोऽस्तु गुरुदेव! *(साष्टाङ्गं प्रणमति)*

शुक्राचार्यः – कल्याणमस्तु। उत्तिष्ठतु राजन्!

वृषपर्वा – अस्माकम् आतिथ्ये कापि त्रुटिर् भवति गुरुदेव?

शुक्राचार्यः – त्रुटिः? राज्ञः वृषपर्वणः आतिथ्ये त्रुटिः! असम्भवं राजन्!

वृषपर्वा – अपि देवयान्याः सर्वं कुशलम्?

शुक्राचार्यः – आम् राजन्! तां प्रसन्नां दृष्ट्वा अहं सुप्रसन्नः। *(राजा वृषपर्वा उपवेशनाय सिंहासनं दर्शयति। शुक्राचार्यः तत् निराकृत्य पार्श्वस्थे आसने उपविश्य)* राजन्, अद्य वयम् आश्रमं प्रतिगन्तुम् इच्छामः।

वृषपर्वा – एँ! तथा शीघ्रम्?

शुक्राचार्यः – आम् राजन्! आश्रमात् दूरे अधिक-कालं स्थातुं न शक्नोमि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृषपर्वा – या इच्छा भवतः। महामन्त्रिन्! गुरुदेवस्य प्रस्थानाय समुचिता व्यवस्था क्रियताम्।

महामन्त्री – करिष्यामि राजन्! *(गुरुदेवं प्रणम्य निष्क्रान्तः)*

वृषपर्वा – आश्रमस्य अर्थे अथवा देवयान्याः अर्थे कापि सेवा अभीष्टा चेत् . . .

शुक्राचार्यः – नहि राजन्! आश्रमे कस्यापि वस्तुनः अभावो नास्ति। प्रयोजने सति कथयिष्यामि। *(शर्मिष्ठा प्रविश्य तिष्ठति।)*

वृषपर्वा – शर्मिष्ठे! किमपि कथयितुम् इच्छसि ?

शर्मिष्ठा – अद्य देवयानी आश्रमं प्रतिगच्छति। अहं तया सह गन्तुम् इच्छामि पितः!

वृषपर्वा – यदि गुरुपादानाम् असौविध्यं स्यात् . . .

शुक्राचार्यः – मम असौविध्यम् ? अयम् आनन्दस्य विषयः राजन्!

शर्मिष्ठा – मया सह शेफालिका, घूर्णिका गमिष्यतः।

वृषपर्वा – अस्तु पुत्रि!

शर्मिष्ठा – धन्यवादाः पितः! *(शुक्राचार्यं नमस्कृत्य निष्क्रान्ता।)*

शुक्राचार्यः – राजन्! वेला अतिक्रामति। आपृच्छे भवन्तम्।

वृषपर्वा – गुरुदेवाः शरणम्। *(साष्टाङ्गं प्रणमति)*

शुक्राचार्यः – विजयी भूयाः।

तृतीयदृश्यम्

(उद्यानम्। देवयानी पुष्पाणि पश्यति नृत्यति च। परं घूर्णिका, शेफालिका अपि आगत्य नृत्यतः।)

एहि पुष्प मम एहि सुमित्र एहि उपवनवासि।
एहि प्रिय सुम एहि मनोरम एहि निकुञ्जनिवासि ॥१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुचिशुभ्रं विमलं तव रूपं कर्षति नयनमनांसि ।
जनजनसेवि त्वं विभुभावि निरहङ्कारं चासि ॥ २॥
जन्म सुधन्यं तव मधुपप्रिय निखिलं त्वं प्रददासि ।
त्वद्वत् सकलं ममापि सत्त्वं प्रभवे नित्यविकासि ॥ ३॥

(देवयानी पुष्पं निरीक्षते। शर्मिष्ठा प्रविश्य)

घूर्णिका– ऑ ! राजकुमारी आगच्छति। इत इतो देवि !

शर्मिष्ठा – घूर्णिके ! अयम् आश्रमः, न तु राजप्रासादः। अत्र अहं युष्माकं सखी। देवयानी कुत्र ?

घूर्णिका – पश्यतु। पुष्पेण सह एकीभूता।

शेफालिका – न श्रोष्यति।

शर्मिष्ठा – *(मन्दम्)* देवयानि ! *(शेफालिकां प्रति)* सा पुष्पं दृष्ट्वा किं चिन्तयति ?

शेफालिका – कथयानि ?

शर्मिष्ठा – कथय। भयं करोषि ?

शेफालिका – नहि। सा चिन्तयति – किम् अधिकं सुन्दरम् ? इदं पुष्पं मम रूपं वा ? किम् अधिकं कोमलम् ? इदं पुष्पं मम शरीरं वा ?

देवयानी – *(बाधमानं भ्रमरं प्रति)* हिस् ! निर्लज भ्रमर ! मम मुखं स्प्रष्टुम् इच्छसि ? अपेहि। धत् ! मम मुखे किं मधु अस्ति ? अपेहि।

शर्मिष्ठा – कुतः गालिं ददासि ? वराक-भ्रमरस्य को दोषः ?

देवयानी – पश्य, कथम् एष बाधते।

शर्मिष्ठा – भ्रान्तः सः किम् अन्यत् कुर्यात् ?

देवयानी – भ्रान्तः ?

शर्मिष्ठा – आम्। स तव मुखं प्रस्फुटितं कमलं मन्यते।

देवयानी – शर्मिष्ठे ! *(अनुरागमिश्रितेन कोपेन)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शर्मिष्ठा – कुतो मयि कुप्यसि ? अहं सत्यं वदामि।

देवयानी – सत्यं वदसि ? *(ताडयितुम् अनुधावति।)*

घूर्णिका – *(मध्ये आगत्य देवयानीं प्रति)* त्वं ताडयितुम् अपि जानासि ?

शर्मिष्ठा – तव रूपं दृष्ट्वा कस्य मोहो न भवेत् ?

देवयानी – त्वं राजप्रासादं त्यक्त्वा अत्र आगता मां क्षोभयितुम् ?

शर्मिष्ठा – नहि, त्वां शोभयितुम्। राजप्रासादे त्वादृशीं स्नेहमयीं सखीं कुत्र प्राप्नुयाम् ? *(हस्तं धरति)*

देवयानी – मुञ्च माम्।

शर्मिष्ठा – पश्य शेफालिके ! अस्याः रोषारुणं मुखमपि कियत् शोभनम् !

देवयानी – *(मुखं विकृत्य)* तव ईर्ष्या भवति ?

शेफालिका – पश्यतु आर्ये, कोऽपि आगच्छति।

शर्मिष्ठा – कुत्र ?

शेफालिका – तत्र ? क एषः कन्दर्पसुन्दरः युवकः ?

शर्मिष्ठा – आम्। किम् एष देवलोकात् अवतीर्णः ?

कचः – *(प्रविश्य)* कियत् शोभनम् उद्यानम् ! शान्तः परिवेशः ! मनोहरं दृश्यम् ! का एताः ? देवकन्यावत् दृश्यन्ते ! किम् आसु देवयानी अस्ति ? कथं जानीयाम् ?

देवयानी – कियत् सुन्दरं वपुः ! मुखमण्डलम् आलोकेन उद्भासितम्। कोऽयम् आनन्दस्य सचलो विग्रहः ?

शर्मिष्ठा – देवयानि ! वयम् आश्रमं प्रतिगच्छामः।

देवयानी – अहमपि आगच्छामि।

शर्मिष्ठा – नहि। पश्य, द्विपाद्-भ्रमर आगच्छति। धर। *(घूर्णिकया शेफालिकया च सह निर्गता।)*

कचः – अभिवादये देवीं देवयानीम्।

देवयानी – को भवान् ? कथं मां जानाति ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कचः – अहं बृहस्पतेः पुत्रः कचः। पितुः मुखात् भवत्याः यशोगानं श्रुतम्।

देवयानी – देवानां गुरुः, भवतः पिता मां जानाति ?

कचः – न केवलं मम पिता, देवेषु अपि भवती सुप्रसिद्धा।

देवयानी – किम् ? *(स्वगतम्)* देवा अपि मम रूपेण मुग्धाः ? कथय युवक, अधिकं कथय। *(प्रकाशम्)* अत्र भवतः किं कार्यम् ?

कचः – अहं भवताम् आश्रमे विद्यार्जनं कर्तुम् आगतः।

देवयानी – अस्माकम् आश्रमे देवकुमाराणां स्थानं नास्ति।

कचः – किन्तु देव्याः अनुग्रहश्चेत् . . .

देवयानी – मम अनुग्रहः ? तेन किम् ? मम पिता भवन्तं न स्वीकरिष्यति।

कचः – गुरुदेवः भवत्याः वचनं निराकर्तुं न शक्नोति। मम परमसौभाग्यं यत् प्रथमं भवतीं पश्यामि। विद्यादानं पवित्रं कार्यं देवि !

देवयानी – चतुरो भवान्, व्यवहारकुशलोऽपि। आगच्छतु। पितुः दर्शनमात्रं कारयिष्यामि।

कचः – धन्यवादाः।

चतुर्थदृश्यम्

(गुरुकुलम्। विद्यार्थिनः वेदपाठं कुर्वन्ति।)

ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

शुक्राचार्यः – अपि सर्वे अस्य मन्त्रस्य अर्थं बोधन्ति ?

प्रथमः छात्रः – गुरुदेव, मा विद्विषावहै इति किम् ?

शुक्राचार्यः – कच, त्वं कथय।

कचः – मा विद्विषावहै इति – आवां परस्परं प्रति दुर्भावं न धारयेव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुक्राचार्यः – साधु। *(प्रथमं छात्रं प्रति)* अवगतम् ?

१ छात्रः – किन्तु . . .

शुक्राचार्यः – किन्तु किम् ?

१ छात्रः – आवयोः दुर्भावः कथं न स्यात् ?

शुक्राचार्यः – त्वं किं कथयितुम् इच्छसि ?

१ छात्रः – कचः देवकुमारः, अहम् असुरकुमारः। यदि आवयोः परस्परं प्रति दुर्भावः न स्यात् तर्हि आवां कथं युद्धं करिष्यावः ?

२ छात्रः – आम्, गुरुदेव ! वयं दुष्टान् देवान् मारयितुम् इच्छामः। *(सर्वे कचात् दूरम् अपसरन्ति।)*

शुक्राचार्यः – सावधानम्। इदं युद्धक्षेत्रं नास्ति। अयम् आश्रमः। यावत् अत्र स्थ तावत् यूयं भ्रातरः। अवगतम् ? *(सर्वे नीरवाः। यथापूर्वम् उपविशत इति गुरुः इङ्गितेन सर्वान् कथयति। शिष्याः तथा कुर्वन्ति।)*

शुक्राचार्यः – कच, त्वम् अत्रत्य-विद्यार्थिजीवनस्य सर्वान् नियमान् जानासि ?

कचः – जानामि गुरुदेव !

शुक्राचार्यः – कथय।

कचः – विद्यार्थी विद्यासमाप्तिं यावत् निजगृहं न गच्छेत्।

शुक्राचार्यः – ततः ?

कचः – गुरोः आदेशान् पालयेत्।

शुक्राचार्यः – कच, अद्य प्रभृति त्वया गावः चारणीयाः। गोसेवां कुरु। इदं तव कार्यम्, इयं तव शिक्षा।

कचः – करिष्यामि गुरुदेव ! *(गन्तुम् उद्यतः)*

शुक्राचार्यः – तिष्ठ ! यदि तव कार्येण, यदि तव सेवया, तव आचरणेन कोऽपि उपाध्यायः असन्तुष्टः भवेत्, तर्हि त्वया गुरुकुलं त्यक्तव्यम्।

कचः – भवतः आज्ञां शिरसि धारयामि गुरुदेव ! *(छात्राः प्रसन्नतां नाटयन्ति।)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुक्राचार्यः – सर्वेषाम् अर्थे समाननियमः। अवगतम् ? *(सर्वे गम्भीराः भवन्ति।)*

सर्वे – आम् गुरुदेव !

शुक्राचार्यः – *(कचं प्रति)* विद्यार्थिजीवनस्य अपरिहार्यः नियमः कः ?

कचः – विद्यार्थी ब्रह्मचारी स्यात्।

शुक्राचार्यः – ब्रह्मचर्यपालनस्य किम् उद्देश्यम् ?

कचः – विद्यार्थिजीवनं तपोमयं भवेत्।

शुक्राचार्यः – किमर्थम् ?

कचः – आत्मज्ञानलाभः विद्यार्थिनां प्रथमं कार्यम्।

शुक्राचार्यः – आम्। तपसा, त्यागेन अस्माकं चित्तवृत्तयः आत्माभिमुखिन्यः भवन्ति। अन्ये के नियमाः विद्यार्थिभिः पालनीयाः ?

३ छात्रः – धरातले शयनम्।

४ छात्रः – ब्राह्ममुहूर्ते उत्थानम्।

शुक्राचार्यः – अस्य अर्थः ?

४ छात्रः – सूर्योदयात् होराद्वयपूर्वं शय्यात्यागः कर्तव्यः।

शुक्राचार्यः – ततः ?

२ छात्रः – क्षार-लवण-मधु-मांसभोजनं न कर्तव्यम्।

१ छात्रः – अण्डम् ?

शुक्राचार्यः – किम् ?

१ छात्रः – गुरुदेव, वयम् अण्डं खादितुं शक्नुमः ?

शुक्राचार्यः – प्रिय सुरमर्दन, यावत् अत्र असि तावत् अण्डं न आवश्यकम्। अत्र दुग्धम्, घृतम्, नवनीतं प्रचुरं प्राप्यते। एतत् सर्वं यथेच्छं खाद। *(छात्राः सम्मतिं नाटयन्ति)* अस्तु। *(प्रथमं छात्रं प्रति)* गुरुकुलस्य विद्यार्थी कीदृशो भवेत् ?

१ छात्रः – *(अनिच्छया, स्मृत्वा स्मृत्वा)* गुरुकुलस्य विद्यार्थी क्षमाशीलः,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जितेन्द्रियः, विनयी, परिश्रमी, *(विस्मरति। द्वितीयः छात्रः 'परोपकारी' इति स्मारयति)* परोपकारी, स्फूर्तिमान्, क्रोधशून्यः, ईर्षारहितः भवेत्।

३ छात्रः – सः आत्मप्रशंसाम्, परनिन्दाम्, कटुभाषणं न कुर्यात्।

शुक्राचार्यः – साधु। अहम् एतान् गुणान् युष्माकम् आचरणे द्रष्टुम् इच्छामि। कच, अधुना त्वं स्वकार्याय गन्तुम् अर्हसि।

कचः – यथाज्ञा गुरुदेवस्य ! *(प्रणम्य निर्गतः)* .

पञ्चमदृश्यम्

(तब्लावाद्यं पृष्ठतः श्रूयते। कुकम्भासुरः उपधौ उपविष्टः। तस्य पादौ खरनन्दनस्य पृष्ठे तिष्ठतः। गजमर्दनः, चर्पटः दुर्दण्डश्च मर्दनं कुर्वन्तः क्लातिं नाटयन्ति। अन्यः एकः मूकः असुरः तत्र प्रहरि-कार्यं करोति।)

कुकम्भः – किं यूयं क्लान्ताः ?

दुर्दण्डः – आम् स्वामिन् ! किञ्चिद् विश्रामम् . . .

कुकम्भः – कः ? दुर्दण्डः ? आगच्छ, उपविश। *(दुर्दण्डः उपविशति। कुकम्भः लत्तयति । दुर्दण्डः दूरे पतति।)* अन्यः कोऽपि क्लान्तः ? चर्पट ?

चर्पटः – नहि स्वामिन् ! अहं न क्लान्तः।

कुकम्भः – साधु चर्पट, साधु। गजमर्दन, त्वम् ?

गजमर्दनः – अहम् आरम्भमात्रं करोमि स्वामिन् !

कुकम्भः – सम्यक् कुरुत। अचिरं मया इन्द्रेण सह युद्धं कर्तव्यम्।

सर्वे – इन्द्रेण सह युद्धम् ?

कुकम्भः – आम्, तेन मर्कटेन सह योद्धव्यम्।

सर्वे – इन्द्रः मर्कटः ?

कुकम्भः – अथ किम् ? यथा हस्ते प्रस्तरं दृष्ट्वा मर्कटो धावति तथा मम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्त्रं दृष्ट्वा इन्द्रः पलायते। हा हा हा *(सर्वे हसन्ति। हठात् कुकम्भं हासात् विरतं दृष्ट्वा सर्वे विरमन्ति।)* चर्पट, किञ्चिद् बलेन कुरु। तव शरीरे बलं नास्ति ?

चर्पटः – अस्ति स्वामिन् ! बलं जलं भूत्वा तलं गच्छति।

कुकम्भः – एवम् ! तर्हि त्वमपि गच्छ। *(घाटे अर्धचन्द्रं दत्त्वा नुदति। चर्पटः भूमौ पतति। मूकः असुरः तम् उत्थाप्य 'एवं कुरु, बलम् आगमिष्यति' इति अस्पष्टवाचा, अभिनयेन दर्शयति।)*

मूकः असुरः – *(अस्पष्टवाचा)* वदत, मर्दनं बलवर्धनम् ! *('मर्दनं बलवर्धनम्' इति वदन्तः सर्वे मर्दयन्ति। कुकम्भासुरं सुप्तं दृष्ट्वा सर्वे शान्ताः। किन्तु खरनन्दनः 'मर्दनं बलवर्धनम्' इति वदति।)*

दुर्दण्डः – *(खरनन्दनं चपेटयित्वा)* इश्श्, स्वपिति। *(ततः गत्वा सर्वे एकत्र उपविश्य)*

चर्पटः – अहं क्लान्तः।

दुर्दण्डः – अहम् अपि। मम हस्तः व्यथते।

गजमर्दनः – कियता बलेन मर्दयामि। अस्य गजचर्मणः किमपि न भवति !

दुर्दण्डः – मम कष्टं भवति। एष कथयति – मर्दनेन बलं वर्धते। हुँः !

चर्पटः – मर्दनेन कस्य बलं वर्धते ? मम अथवा तस्य ?

दुर्दण्डः – पश्य, कियत् तैलं नष्टं भवति।

गजमर्दनः – आम्, एष तैलं नाशयति, अस्मान् त्रासयति।

कुकम्भः – *(हठात् उत्थाय, गजमर्दनस्य घाटं धृत्वा)* तैलं नाशयामि ?

गजमर्दनः – नहि स्वामिन् ! तैलं भवतः शरीरे आत्मानम् अर्पयित्वा धन्यं भवति।

कुकम्भः – त्वं तैलमर्दनस्य उपकारं जानासि ?

गजमर्दनः – नहि स्वामिन् !

कुकम्भः – मम गुरोः गुरोः गुरुः अकथयत् . . .

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुर्दण्डः – किम् अकथयत् स्वामिन् ?
कुकम्भः – सः अकथयत् – घृतादष्टगुणं तैलं मर्दनात् न तु भक्षणात्।
चर्पटः – अस्य अर्थः ?
कुकम्भः – अस्य अर्थः, तैलस्य मर्दनेन, न तु भोजनेन, घृतापेक्षया अष्टगुणः उपकारः भवति।
गजमर्दनः – आम् स्वामिन्, अर्धाङ्गिनीं कथयिष्यामि – मा देहि तेमने तैलं शरीरे मर्दनं कुरु।

(कोऽपि आगच्छति इति मूकः असुरः दर्शयति।)

कुकम्भः – *(प्रचण्डबुद्धिम् आगच्छन्तं दृष्ट्वा)* को व्यापारः प्रचण्डबुद्धे !
प्रचण्डबुद्धिः – व्यापारो भयङ्करः स्वामिन् !
कुकम्भः – भयङ्करः ? हा हा हा !
प्रचण्डबुद्धिः – आम् स्वामिन् ! शुक्राचार्यस्य आश्रमे देवगुरु-बृहस्पतेः पुत्रः विद्याध्ययनं करोति।
कुकम्भः – जानामि।
प्रचण्डबुद्धिः –एँ, भवान् जानाति !
कुकम्भः – एतदपि जानामि, सः साधु पठति, अपि च, देवयानी तस्मिन् अनुरागवती। तेन अहं सन्तुष्टः।
प्रचण्डबुद्धिः – तेन भवान् सन्तुष्टः ?
कुकम्भः – आम्, प्रचण्डबुद्धे !
प्रचण्डबुद्धिः – किमर्थं स्वामिन् ? तेन अस्माकं हानिर् भविष्यति।
कुकम्भः – कथम् ? कचः देवयान्याः पाणिं गृहीत्वा अत्रैव स्थास्यति। तेन अस्माकं लाभः।
प्रचण्डबुद्धिः – यदि सः देवयानीं गृहीत्वा गच्छेत् ?
दुर्दण्डः – यथा तस्य योग्यता, यदि शुक्राचार्यः तं मृतसञ्जीवनी-विद्यां शिक्षयेत् ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वे – तदा किं भवेत् ?

प्रचण्डबुद्धिः – भवान् तु जानाति, कचस्य पिता बृहस्पतिः अस्माभिः सह कीदृशीं छलनाम् अकरोत्।

कुकम्भः – तर्हि ?

प्रचण्डबुद्धिः – भवान् एव कथयतु, स्वर्गे का विद्या नास्ति ?

कुकम्भः – का विद्या ? त्वं वद। त्वं तु प्रचण्डबुद्धिः।

प्रचण्डबुद्धिः – स्वर्गे मृतसञ्जीवनीविद्या नास्ति।

कुकम्भः – तर्हि तामेव विद्यां शिक्षितुं कचः अत्र आगतः ?

प्रचण्डबुद्धिः – आम् स्वामिन् ! यदि सः तां विद्यां शिक्षित्वा गच्छेत् ?

कुकम्भः – नहि, तत्पूर्वं तस्य विनाश आवश्यकः।

दुर्दण्डः – स निकटस्थे वने गाश्चारयति स्वामिन् !

कुकम्भः – तर्हि चल।

प्रचण्डबुद्धिः – नहि।

कुकम्भः – कुतो नहि ?

प्रचण्डबुद्धिः – यदा सः गुरुप्रदत्ते कार्ये व्यापृतः अस्ति तदा तस्य विनाशः अशक्यः।

कुकम्भः – तर्हि उपायः ?

प्रचण्डबुद्धिः – तं छलेन दूरं नीत्वा . . .

कुकम्भः – आम्, अवगतम्, अवगतम्। साधु, अतीव साधु। गच्छत। हा हा हा . . .

षष्ठदृश्यम्

(हम्बारवः श्रूयते। हुर् हट् हट् इति कथयन् कचः गोवृन्दम् अग्रे नयति। अथ सः वृक्षम् आरुह्य वंशीं वादयति। चर्पट-दुर्दण्ड-गजमर्दनाः घूर्णिका-शेफालिका-कुमुदिनी-रूपं धारयित्वा आगच्छन्ति।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गजमर्दनः – कथं मम वस्त्रम् ? कथं मम रूपम् ?

खरनन्दनः – सत्यं सुन्दरी दृश्यसे।

दुर्दण्डः – अहम् ?

खरनन्दनः – त्वं त्रिपुरसुन्दरी।

चर्पटः – तूष्णीम् ! *(मन्दं मन्दं कचस्य निकटं गच्छन्ति।)*

गजमर्दनः – कुमार ! अत्र आगच्छतु।

कचः – *(वृक्षात् अवरुह्य)* शेफालिके, घूर्णिके, कुमुदिनि ! यूयम् अत्र ?

चर्पटः – देवयान्या वयं प्रेषिताः।

कचः – देवयान्या प्रेषिताः ?

दुर्दण्डः – आम्, कुमार !

कचः – किमर्थम् ?

दुर्दण्डः – भवान् इदं भयङ्करं वनं प्रथमवारम् आगतः ! अस्मिन् वने कुत्र गन्तव्यम्, कुत्र न गन्तव्यम् . . .

गजमर्दनः – कुत्र निर्मलं जलम् अस्ति, कुत्र मधुरं फलम् अस्ति . . .

चर्पटः – एतत् सर्वं दर्शयितुं वयम् आगताः।

कचः – *(खरनन्दनम् उद्दिश्य)* सा का ?

दुर्दण्डः – मम भगिनी चूर्णिका।

गजमर्दनः – आगच्छतु कुमार ! निकटे एकं सुन्दरं निर्झरं दर्शयिष्यामः।

चर्पटः – तत्र मधुराणि फलानि सन्ति।

दुर्दण्डः – आगच्छतु।

कचः – गोवृन्दं त्यक्त्वा कथं गच्छेयम् ?

चर्पटः – अहं पश्यामि। मया गोचारणं बहुवारं कृतम्। हुर् हट् हट् . . .

गजमर्दनः – एष देवयान्याः आदेशः।

दुर्दण्डः – आम्, शीघ्रम् आगच्छतु।

चर्पटः – देवयानी भवति कियत् स्निह्यति !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गजमर्दनः – सा भवतः विषये कियत् चिन्तयति ! नैवं घूर्णिके ?

चर्पटः – आम्, शीघ्रम् आगच्छतु। *(सर्वे निर्गताः। नेपथ्ये कचस्य चीत्कारः श्रूयते। ततः चर्पट-खरनन्दनौ रक्ताक्त-छुरिकां धृत्वा प्रत्यागत्य)*

चर्पटः – मृतसञ्जीवनीविद्यां शिक्षितुम् आगतः !

खरनन्दनः – खण्डशः कृतं तव मृतदेहं हिंस्रपशवः अचिरं खादिष्यन्ति। हा हा हा . . . हा हा हा . . .
(हिंस्रपशूनां शब्दाः। ततः सर्वे रङ्गमञ्चम् आगत्य स्वस्वनारीवेषं दर्शयित्वा हसन्तः)

दुर्दण्डः – मृतः।

चर्पटः – मारितः।

खरनन्दनः – गतः।

गजमर्दनः – समाप्तः। *(सर्वे हसन्तः निष्क्रान्ताः)*

सप्तमदृश्यम्

(छात्राणां समवेतगानम् अन्धकारे आरभ्यते। प्रथमचरणात् परं मञ्चे प्रकाशः। ततः द्वे बालिके मृत्पात्रयोः कर्पूरं ज्वालयित्वा तुलसीचत्वरे वृन्दावत्याः वन्दनां कृत्वा, पात्रं भूमौ स्थापयित्वा प्रणम्य च निष्क्रान्ते।)

चेतसि वेदज्योतिर् ज्वालय हे प्रभो !
शरणं त्वं हि मदीयं ज्ञानं देहि विभो ॥ ध्रु.॥
देव त्वमसि मम सत्त्वनियन्ता
याच्ञा मदीया भव बुद्धिप्रदाता ।(२)
सरलः शुद्धो बुद्धः प्रयाणि सत्पथे ॥ शरणं त्वं हि मदीयं . . .
शील-सुजनतादि-गुणसमुपेता
सत्ता भवतु मम सद्गुणवित्ता ।(२)
मनसा वाचा कृत्या भवानि ते प्रियः॥ शरणं त्वं हि मदीयं . . .

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुक्राचार्यः – सान्ध्यवन्दनं समाप्तम्। अधुना गत्वा पाठचर्चां कुरुत।

देवयानी – *(प्रविश्य)* पितः, सर्वा गावः प्रत्यागताः, किन्तु कुमारं न पश्यामि।

शुक्राचार्यः – आगमिष्यति।

देवयानी – गोवृन्देन सह तेन आगन्तव्यम् आसीत्। कुतो न आगतः ? मम शङ्का भवति पितः !

शुक्राचार्यः – शङ्का ?

देवयानी – आम् पितः ! मन्ये, असुरैः कापि दुष्टता कृता।

शुक्राचार्यः – दुष्टता ?

देवयानी – आम्। असुरैः कुमारः अपहृतः अथवा . . . नहि, तन्न भवेत्।

शुक्राचार्यः – अशुभं न चिन्तय पुत्रि !

देवयानी – अन्तरे असुखम् अनुभवामि। दक्षिणनेत्रं स्फुरति। अवश्यं किमपि दुर्घटितम्।

शुक्राचार्यः – *(ध्यानं कृत्वा)* आम् पुत्रि ! तव वचनं सत्यम्। असुराः कचं मारितवन्तः।

देवयानी – मारितवन्तः ? कुमारः मृतः ! अहं कथं जीवामि ! कथं प्राणान् धारयामि ? हा हन्त ! *(अचेतना भवति)*

शुक्राचार्यः – *(मन्त्रपूतं जलं सिञ्चति। देवयानी चेतनां प्रतिलभते)* शुक्राचार्यस्य पुत्री एकस्य कुमारस्य वियोगेन तथा अधीरा भवति ! एतत् त्वयि न शोभते पुत्रि !

देवयानी – कचः सामान्यः कुमारः नासीत् ! तद्वत् मेधावी, कर्मनिष्ठः, चरित्रवान् शिष्यः कुत्र लभ्यते ?

शुक्राचार्यः – किन्तु . . .

देवयानी – किन्तु नहि पितः, भवान् तं जीवयतु।

शुक्राचार्यः – शृणु पुत्रि, असुराः असन्तुष्टा भविष्यन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवयानी – भवन्तु। अन्यथा अहं वनं गच्छामि, गहनं वनं गच्छामि। तत्र यद् भवति भवतु। *(गच्छति)*

शुक्राचार्यः – तिष्ठ ! *(मन्त्रं पठति। वज्रनादः श्रूयते। रङ्गमञ्चे अन्धकारः, ततः विद्युत् चकास्ति। प्रकाशे सति कचं दृष्ट्वा देवयानी आनन्देन वदति –)*

देवयानी – कुमार !

कचः – *(शुक्राचार्यं प्रति)* अभिवादये। भवतः कृपया पुनरुज्जीवितोऽस्मि।

शुक्राचार्यः – आयुष्मान् भव। वत्स, त्वं गोवृन्दं त्यक्त्वा कुत्र अगच्छः ?

कचः – शेफालिका, घूर्णिका, कुमुदिनी मां जल-फलादि-स्थानं दर्शयितुं दूरम् अनयन्।

देवयानी – शेफालिका, घूर्णिका, कुमुदिनी ? एताः कदा वनम् अगच्छन् ?

कचः – अद्य मध्याह्ने।

देवयानी – अद्य मध्याह्ने ? अद्य मध्याह्ने तु एताः अत्रैव आसन्। नैवं पितः ?

शुक्राचार्यः – पुत्रि, असुराः छलेन शेफालिका-घूर्णिका-कुमुदिनी-रूपं धारयित्वा, कचं मम सुरक्षा-वलयात् दूरं नीत्वा अमारयन् . . . वत्स, यदि त्वं मत्प्रदत्तं कार्यं त्यक्त्वा न अगमिष्यः तर्हि इदम् अनिष्टं न अभविष्यत्।

देवयानी – कथम् ?

शुक्राचार्यः – यः मम कार्ये व्यापृतः तिष्ठति सः सुरक्षाकवचेन कवचितो भवति। *(कचं प्रति)* सावधानम्। पुनरेवं मा कुरु।

कचः – क्षम्यतां गुरुदेव ! पुनर्न करिष्यामि।

देवयानी – पितः, कुमारः वनं न गच्छेत्।

शुक्राचार्यः – आम् वत्स, इतः परम् आश्रमपरिसरात् बहिर् न गच्छ।

कचः – न गमिष्यामि गुरुदेव ! *(प्रणमति)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टमदृश्यम्

(पक्षिणां कलरवाः श्रूयन्ते। देवयानी पादपेषु जलं सिञ्चति। कचः अध्ययन-रतः।)

कचः – *(देवयानीं दृष्ट्वा ताम् उपगम्य)* मह्यं ददातु।

देवयानी – कुतः ? भवान् गत्वा अध्ययनं करोतु। छात्राणाम् अध्ययनं तपः।

कचः – अन्येषां साहाय्यं छात्राणां धर्मः। ददातु। *(आच्छेत्तुं चेष्टते)*

देवयानी – नहि। स्वकार्यं स्वयं कर्तव्यम्।

कचः – देवि, भवत्याः कोमलहस्तेन इदं कठिनं कार्यं न युज्यते।

देवयानी – पश्यतु कुमार ! जलं प्राप्य इदं कोमलं लताकुञ्जं कियत् शोभते !

कचः – किन्तु अन्या एका लता निस्तेजा भवति।

देवयानी – किम् ?

कचः – यदि अहं जलं दद्यां तर्हि इदं लताकुञ्जम्, एषा चलन्ती लता, उभयं सुन्दरं भविष्यति।

देवयानी – *(लज्जया)* हुंः, सर्वदा रसिकता। भवान् मम उपकारं कृत्वा मां स्नेहरज्जुभिः बन्धुम् इच्छति ?

कचः – तादृशं साहसं मम नास्ति देवि !

देवयानी – अस्ति, अस्ति। पर्याप्तम् अस्ति।

कचः – कथम् ?

देवयानी – कथयानि ?

कचः – कथयतु।

देवयानी – नहि, न कथयिष्यामि।

कचः – अरे, कथयतु।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवयानी – नहि, भवान् अन्यथा चिन्तयेत्।

कचः – अहं न चिन्तयिष्यामि।

देवयानी – न न, किमपि नास्ति।

कचः – अरे, कथयतु। लज्जा कुतः ?

देवयानी – कथयानि ?

कचः – आम्, आम्, कथयतु।

देवयानी – शृणोतु। अधुनावधि कोऽपि युवकः मम सम्मुखम् आगन्तुं साहसं न अकरोत्। किन्तु भवान् . . .

कचः – *(स्मयमानः)* मया किं कृतम् ?

देवयानी – नहि, किमपि नास्ति।

कचः – वाक्यं पूरयतु। *(हस्तौ धरति)*

देवयानी – उः, हठियुवक ! भवान् मम हृदयतन्त्रीं स्पृष्टवान्। भवान् कामपि मोहिनीविद्यां जानाति।

कचः – मोहिनीविद्या ?

देवयानी – आम्।

कचः – अहं न जानामि।

देवयानी – भवान् अवश्यं जानाति। अन्यथा भवन्तं दृष्ट्वा कथम् आत्मानं विस्मरामि ?

कचः – ओ. . ., अहं भवत्यां स्निह्यामि।

देवयानी – भवान् मयि स्निह्यति ?

कचः – आम्।

देवयानी – भवान् मयि सत्यं स्निह्यति ?

कचः – कुतः सन्देहः ?

देवयानी – अस्तु, कुमार ! मया श्रुतम् – स्वर्गे अप्सराः सन्ति।

कचः – आम्, बहवः सन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवयानी – तासां रूपम् अतीव सुन्दरम् ?

कचः – आम्।

देवयानी – तासु का भवतः प्रिया ?

कचः – कापि नास्ति।

देवयानी – कापि नास्ति ? किमर्थम् ?

कचः – यतो हि अहं रूपस्य गुणस्य च समन्वयं कस्यामपि न पश्यामि।

देवयानी – कस्यामपि रूपगुणयोः समन्वयः नास्ति ?

कचः – अस्ति।

देवयानी – कुत्र ?

कचः – भवत्याम्।

देवयानी – हेः, पुनः रसिकता ? आगच्छतु, अनेन मार्गेण गच्छाव। *(निर्गतौ)*

१ असुरः – हि हि हि। दृष्टम् ? दृष्टं त्वया ब्रह्मचर्यपालनस्य रमणीयं दृश्यम् ?

२ असुरः – एष गुरुकुलस्य उत्तम-विद्यार्थी ! हुंः ! भण्डः !

३ असुरः – गतवारे पशूनाम् उदरं विदार्य उज्जीवितः। अस्मिन् वारे ?

१ असुरः – द्रक्ष्यामि, अस्मिन् वारे कथं जीवसि ! हुंः !

नवमदृश्यम्

(कचः ध्यानस्थः। त्रयः छात्राः प्रविश्य)

१ छात्रः – पश्य, ध्यानं करोति !

२ छात्रः – क्षीण, दुर्बल देवकुमार ! ध्यानं कृत्वा किं प्राप्स्यसि ?

१ छात्रः – ध्यानेन अस्मादृशं स्वास्थ्यम्, बलं न प्राप्स्यसि।

३ छात्रः – *(आशीर्वाद-मुद्रया स्थित्वा नारीकण्ठेन)* वत्स, अहम् आगता। नेत्रं विस्फार्य पश्य। कां सिद्धिम् इच्छसि ? वद, दास्यामि। *(ततः देवयानीम् आगच्छन्तीं दृष्ट्वा सर्वे पलायन्ते।)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवयानी – कुमार, उत्तिष्ठतु। भोजनं शीतलं भवति। तपस्यया शरीरं न पीडनीयम्। भोजनाय आगच्छतु। *(किमपि चिन्तयित्वा)* सामान्य-भोजनाय अस्य तपोभङ्गः पापं स्यात्। अस्यार्थे प्रतीक्षायामपि आनन्दः। *(निष्क्रान्ता)*

दशमदृश्यम्

(देवासुरसंग्रामः)

इन्द्रः – देवाः ! निवर्तध्वम्।

कुकम्भासुरः – देवाः पलायन्ते। मारयत, मारयत।

एकादशदृश्यम्

(रङ्गमञ्चे अन्धकारः। श्वेत-तिरस्करण्यां शुक्राचार्यस्य छायारूपं दृश्यते। कुकम्भासुरः मृतं खरनन्दनं हस्तयोः निधाय शुक्राचार्यस्य पादयोः स्थापयति।)

कुकम्भासुरः – गुरुदेव, इमं जीवयतु कृपया।

शुक्राचार्यः – वत्स, उत्तिष्ठ।

खरनन्दनः – *(सुप्तोत्थित इव इतस्ततः दृष्ट्वा)* युद्धम्, युद्धम् *(इति चीत्कारं कुर्वन् पलायितः।)*

द्वादशदृश्यम्

(प्रचण्डबुद्धिः पात्रं धृत्वा पुरः पश्चात् क्षिप्रं गमनागमनं करोति, दूरं पश्यति, कमपि प्रतीक्षते। ततः असुराः प्रविशन्ति।)

प्रचण्डबुद्धिः – कृतम् ?

गजमर्दनः – आम्, शीघ्रं तस्य प्राणपक्षी ऊर्ध्वं गमिष्यति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खरनन्दनः – कच, अद्य तव लीला समाप्ता। *(दुःखेन)* कचः मृतः। *(क्रन्दति)*

गजमर्दनः – *(सान्त्वयन्)* मा क्रन्द खरनन्दन, मा क्रन्द। *(हठात् सर्वे उच्चैः हसन्ति, 'अहो आनन्दः, नश्यतु इन्द्रः' इति उद्घोषयन्तः प्रचण्डबुद्धेः पृष्ठतः गच्छन्ति।)*

प्रचण्डबुद्धिः – *(हठात् परावृत्य)* गुरुदेव-शुक्राचार्यः यदि पृच्छेत् यूयं किं कथयिष्यथ ? अस्मिन् पात्रे किम् अस्ति ? चर्पट, त्वं कथय।

चर्पटः – समानकथां कतिवारं कथयेयं प्रचण्डबुद्धे ?

प्रचण्डबुद्धिः – पुनः पुनः कथनीयम्। अन्यथा यूयं वानराः अनर्थं करिष्यथ। चर्पट, शीघ्रं कथय।

चर्पटः – अस्मिन् पात्रे पानकम् अस्ति।

प्रचण्डबुद्धिः – किं पानकम् अस्ति ?

चर्पटः – दीर्घजीवनहारकं पानकम् अस्ति।

प्रचण्डबुद्धिः – गर्दभः !

चर्पटः – नहि, अहं चर्पटः।

प्रचण्डबुद्धिः – धन्या तव स्मरणशक्तिः।

गजमर्दनः – कुतो भवान् कठिनशब्दान् ददाति ?

खरनन्दनः – अहं जानामि।

प्रचण्डबुद्धिः – कथय।

खरनन्दनः – अस्मिन् पात्रे दीर्घजीवनवारकं पानकम् अस्ति।

प्रचण्डबुद्धिः – नहि खरनन्दन ! अस्मिन् पात्रे दीर्घजीवनकारकं पानकम् अस्ति।

सर्वे – आम्, स्मरामः। अस्मिन् पात्रे दीर्घजीवनकारकं पानकम् अस्ति। *(दीर्घजीवनकारकं पानकम्, दीर्घजीवनकारकं पानकम् इति जपन्तः गच्छन्ति।)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रचण्डबुद्धिः – तूष्णीम्! गुरुदेवस्य निकटे कोऽपि मुखं न उद्घाटयेत्। यत् कथनीयं तत् अहं कथयिष्यामि। *(सर्वे मौनं धारयन्ति। गुरुदेव, गुरुदेव इति प्रचण्डबुद्धेः आह्वानं श्रुत्वा शुक्राचार्यः द्वारम् उद्घाटयति। प्रचण्डबुद्धिं विहाय अन्ये साष्टाङ्गं प्रणमन्ति।)*

शुक्राचार्यः – कल्याणमस्तु। उत्तिष्ठत। तस्मिन् पात्रे किम् अस्ति ?

प्रचण्डबुद्धिः – देवानां पराजयम् उपलक्ष्य अस्माभिः विशेषं पानकं रचितम्। आस्वादनं कृत्वा अस्मान् कृतार्थयतु गुरुदेव, कृतार्थयतु ! *(शुक्राचार्यः पिबति।)*

शुक्राचार्यः – सुस्वादु अस्ति।

गजमर्दनः – विशेषद्रव्यैः रचितम्।

खरनन्दनः – आम् गुरुदेव ! *(शुक्राचार्यः सर्वं पिबति)*

प्रचण्डबुद्धिः – गुरुदेवो विजयताम्।

सर्वे – विजयताम्, विजयताम्।

प्रचण्डबुद्धिः – असुरकुलं वर्धताम्।

सर्वे – वर्धताम्, वर्धताम्।

प्रचण्डबुद्धिः – देवकुलं क्षीयताम्।

सर्वे – क्षीयताम्, क्षीयताम्। *(सर्वे नृत्यन्तः गच्छन्ति। शुक्राचार्यः असुखं नाटयन् उपविशति।)*

देवयानी – *(प्रविश्य)* पितः !

शुक्राचार्यः – आम्, पुत्रि । किम् इच्छसि ?

देवयानी – कुमारः पुष्पाणि आनेतुं गत्वा अधुनावधि न प्रत्यागतः। आश्रमे कुत्रापि नास्ति।

शुक्राचार्यः – नास्ति ! *(ध्यानं कृत्वा)* पुत्रि, असुरैः अस्मिन् वारे जघन्यं कार्यं कृतम्।

देवयानी – जघन्यं कार्यम् ? किं कृतं पितः ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुक्राचार्यः – अस्मिन् वारे ते तव रूपं धृत्वा, कचं दूरं नीत्वा, तं मारयित्वा, अग्नौ ज्वालयित्वा, तस्य भस्म पानके मिश्रयित्वा मां पायितवन्तः।

देवयानी – *(चीत्कारेण)* नहि . . .

शुक्राचार्यः – विधेर्विधानं विचित्रं पुत्रि !

देवयानी – हा हन्त ! कुमारः भवतः उदरात् कथं निर्गमिष्यति ?

शुक्राचार्यः – मम मृत्युं विना कचः जीवितुं न शक्नोति।

देवयानी – तन्नेच्छामि पितः ! भवन्तं विना जीवितुं न शक्नोमि। कुमारं विना जीवितुं नेच्छामि। *(क्रन्दन्ती)* वारंवारम् असुराः मारयन्ति। भवान् किमपि न कथयति। अधुना मया किं कर्तव्यम् ? हे भगवन् ! कथं द्वौ जीवेताम् ? कथम् ? *(क्षणात् परम्)* पितः, भवान् मां सञ्जीवनीविद्यां शिक्षयतु।

शुक्राचार्यः – तव सा योग्यता नास्ति पुत्रि ! अहम् इच्छन्नपि त्वां शिक्षयितुं न शक्नोमि।

देवयानी – तर्हि कुमारं शिक्षयतु।

शुक्राचार्यः – आम्, कचः योग्यं पात्रम्। किन्तु . . .

देवयानी – किन्तु किं पितः ?

शुक्राचार्यः – यदि सः स्वयं जीवित्वा मां न जीवयेत् . . .

देवयानी – नहि पितः, कुमारस्तथा नास्ति। अहं प्रतिजानामि – सः गुरुद्रोहं कदापि न करिष्यति। भवान् सञ्जीवनीविद्यां शिक्षयतु ।

शुक्राचार्यः – *(ध्यानस्थः। ध्वनिलिखितस्वरेण कच-शुक्राचार्ययोः आलापः श्रूयते)* मम उदरे कस्त्वम् ?

कचः – भवतः शिष्यः कचः गुरुदेव !

शुक्राचार्यः – अशरीरस्त्वं मम वचनं बोधसि ?

कचः – आम् गुरुदेव, सम्यक् बोधामि।

शुक्राचार्यः – सञ्जीवनीविद्यां शिक्षितुम् आगत्य त्वया सा इच्छा कदापि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न प्रकाशिता। वत्स, तव आचरणेन अहम् अतीव सन्तुष्टः। अधुना तां विद्यां शिक्षयितुम् इच्छामि। किन्तु मम शरीरं ध्वस्तं भविष्यति।

कचः – मदर्थं भवतः शरीरनाशः ! नहि गुरुदेव, तन्नेच्छामि।

शुक्राचार्यः – नहि वत्स, सञ्जीवनीविद्यां शिक्षित्वा उचितं मन्यसे चेत् माम् उज्जीवय।

कचः – अवश्यं गुरुदेव ! तत् मम परमं सौभाग्यं स्यात्।

शुक्राचार्यः – तर्हि योगस्थः शृणु। *(मञ्चे अन्धकारः। मन्त्राः श्रूयन्ते)* ॐ महाकालाय नमः। सञ्जीवय, सञ्जीवय। ॐ रुद्राय नमः। सञ्जीवय, सञ्जीवय। ॐ धूर्जटये नमः। सञ्जीवय, सञ्जीवय। ॐ शिवाय नमः। सञ्जीवय, सञ्जीवय। *(घोरवज्रध्वनिः, झञ्झावातशब्दः, विद्युत्। ततः रङ्गमञ्चे प्रकाशः। कचः चिन्तामग्नः तिष्ठति। शुक्राचार्यः भूमौ शयानः।)*

देवयानी – कुमार . . . कुमार, पितरम् उज्जीवयतु। *(कचं नीरवं दृष्ट्वा स्वगतम्)* किम् एष गुरुद्रोहं करिष्यति ? तदा अस्माकं किं भवेत् ? *(प्रकाशम्)* कुमार, कृपया . . .

कचः – जानामि स्वकर्तव्यम्। *(गुरुं प्रणम्य मन्त्रं पठति। शुक्राचार्यः उज्जीवितः।)* सञ्जीवनीविद्याप्रदानेन अनुगृहीतोऽस्मि। *(प्रणमति)*

शुक्राचार्यः – मयि तव अविचलां गुरुभक्तिम्, त्वयि देवयान्याः गभीराम् अनुरक्तिं दृष्ट्वा अहम् अतीव प्रसन्नः। *(देवयानी लज्जया पलायते।)* वत्स, अद्य तव विद्या सफला। त्वं परीक्षायाम् उत्तीर्णः।

त्रयोदशदृश्यम्

(देवयानी उद्याने भ्रमति।)

देवयानी – *(पुष्पाणि प्रति)* युष्मान् त्यक्त्वा गन्तुम् इच्छा न भवति। किन्तु पिता यदि अनुमतिं दद्यात् तर्हि मया स्वर्गपुरं गन्तव्यमेव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

युष्माकम् अवेक्षणाय सुव्यवस्था कृता। यूयं तु जानीथ – अस्मिन् संसारे कोऽपि स्थिरो नास्ति। देवगुरु-बृहस्पतेः पुत्रवधूत्वं किं स्वल्पसौभाग्यस्य विषयः ?

कचः – *(स्वगतम्)* देवयानीं किं वदेयम् ? कथं ताम् उपगच्छेयम् ? या मयि इयत् स्निह्यति, या मम इयत् अकरोत्, तां प्रति कृतज्ञतां कथं प्रकाशयेयम् ? एकतः देवकार्यम्, अन्यतः स्नेहबन्धनम्। एकतः देवयानी, अन्यतः कर्तव्यस्य आह्वानम्। तर्हि . . . ?

देवयानी – *(कचं दृष्ट्वा आनन्देन)* कुमार, पितुः अनुमतिर् गृहीता ?

कचः – देवि ! गुरुदेवस्य आशिषं गृहीत्वा आगतोऽस्मि। स्वर्गपुरं प्रतिगमनाय आदिशतु देवि !

देवयानी – *(आश्चर्येण)* किम् ?

कचः – एष गुरुदेवस्य आदेशः।

देवयानी – भवान् एकलः गच्छति ? मां त्यक्त्वा ?

कचः – मया गन्तव्यमेव।

देवयानी – कुमार, अत्र भवतः सर्वा कामना पूर्णा ?

कचः – आम् देवि ! अद्याहं पूर्णकामः, सिद्धमनोरथः।

देवयानी – *(स्मयमानः)* हृदयम् अवगाह्य पश्यतु कुमार ! तत्र मन्ये कापि सूक्ष्मा इच्छा निगूढास्ति।

कचः – नहि देवि ! अद्य मम कृतार्थं जीवनम्। पूर्णा मम मनोवाञ्छा। नास्ति दैन्यम्, नास्ति शून्यं कुत्रापि हृदये।

देवयानी – पूर्णं तव ब्रह्मचर्यव्रतम् ?

कचः – आम् देवि ! तत्र प्राप्तं त्वदीय-साहाय्यम्। चिरकालं कृतज्ञोऽहम्।

देवयानी – किमनेन शुष्केण वाक्येन ? गच्छ इतः प्रस्तरहृदय !

कचः – नास्ति इदं शुष्कं वाक्यम्। मस्तकं मे अवनतं कृतज्ञभावेन। आदिशतु देवि ! कुर्यां किञ्चित् प्रियं तव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवयानी – जानामि ते तपस्तप्तं कठोर-हृदयम्। नास्ति तत्र त्यागसुधा, नास्ति तत्र प्रेम-मन्दाकिनी।

कचः – नहि भद्रे, न वद ईदृशम्। त्वयि मम स्नेहः अप्रतिमः।

देवयानी – यदि सत्यमेतत्, तर्हि त्यक्त्वा मां न गच्छ कुमार ! तिष्ठ अत्र। रचयाव नवस्वर्गम्, नवसृष्टिम्, नवनिकेतनम्।

कचः – किं वदसि त्वम् ?

देवयानी – एष मम अभिलाषः प्रथम-दर्शनात्। तव स्निग्ध-सुगम्भीर-दृष्टिः हृदयं मे क्रीतवती।

कचः – देवि, तव सुधा-मधुर-वचनं प्रतापि-राजकुमारं क्रेतुम् अलम्। किन्तु त्वं मम दृष्टौ गुरुपुत्री एव।

देवयाानी – तेन किम् ?

कचः – नहि देवि, गुरुवद् गुरुसन्ततिषु वर्तितव्यमिति शास्त्राणाम् आदेशः।

देवयानी – यदि गुरोः अनुमतिः स्यात् ? आत्मज्ञानी गुरुः शास्त्रैर् न बद्धः। अहं पितुः अनुमतिं प्राप्तुं शक्नोमि।

कचः – नहि देवि, त्वमसि मे सुप्रिया भगिनी।

देवयानी – कथम् ? बृहस्पति-नन्दनस्त्वम्। अहमस्मि भार्गवनन्दिनी।

कचः – कथं नासि भगिनी त्वम् ? द्वितीयं जन्म मम तव पितृकुक्ष्याः। तव पिता मम जन्मदाता।

देवयानी – *(आवेगेन)* छलिताहं कुमार किमर्थम् ? कुतस्त्वया रचितं नाटकम् ?

कचः – देवि ! निर्दोषोऽहम्। सेवाधर्म आचरितो मया। भ्रान्तासि त्वं निजकल्पनया।

देवयानी – न जानासि कुमारीहृदयम् ? एष मम घोर-अपमानः। *(क्रन्दति)*

कचः – क्षमस्व कल्याणि !

देवयानी – क्षमा ? वारत्रयम् अजीवयम्। सुदुर्लभा सञ्जीवनीविद्या दत्ता। एतत् तस्य प्रतिदानम् ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कचः – कृतज्ञोऽहं तदर्थं कल्याणि !

देवयानी – कृतज्ञता ? नेच्छामि ते कृतज्ञताम्। विनापि त्वां जानामि जीवितुम्। किन्तु स्मर कच – अत्र त्वया प्राप्तया विद्यया कमपि त्वं जीवयितुं न शक्नोषि। एष मम अभिशापः। *(द्रुतं निष्क्रान्ता)*

कचः – देवि ! किमिदं कथितं त्वया ? कल्याणि, जानामि ते अभिशापः फलिष्यति एव। तथापि भगिनि, त्वमसि मे अतिप्रिया। प्रभो, दयामय, शृणु मे प्रार्थनाम्। विस्मरतु देवयानी ग्लानिम्, विस्मरतु दुर्भावनाम्।

चतुर्दशदृश्यम्

(देवाः पलायन्ते। असुराः अनुधावन्ति।)

१ असुरः – कुतः पलायसे इन्द्र ? आगच्छ। पलायनं भीरूणां धर्मः।

२ असुरः – आगच्छ। विक्रमं दर्शय। हुंः ! क्षुद्रहृदयः !

१ असुरः – अस्माकं गुरुदेवात् विद्यां शिक्षित्वा विजयं प्राप्स्यसि ? असम्भवम्।

२ असुरः – कचस्य आगमनात् पूर्वं त्वां मारयिष्यामः।

सर्वे असुराः – *(विशालं प्रस्तरम् उत्तोल्य कुकम्भासुरं प्रविशन्तं दृष्ट्वा आनन्देन)* मारयत, मारयत।

पञ्चदशदृश्यम्

(बृहस्पतिः तालपत्रे किमपि लिखति। नेपथ्ये 'मारय, मारय' इति असुराणाम्, 'त्रायस्व, त्रायस्व' इति देवानां स्वरः श्रूयते।)

इन्द्रः – *(धावन् प्रविश्य)* त्रायस्व गुरुदेव !

बृहस्पतिः – किं जातम् ?

इन्द्रः – असुरा अनुधावन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बृहस्पतिः – किम् ? *(उत्तिष्ठति। तस्य क्षिप्रतेजसा त्रस्ताः असुराः धृतं मातलिं भूमौ पातयित्वा पलायन्ते।)*

इन्द्रः – आम् गुरुदेव ! एषाम् अत्याचारं सोढुं न शक्नुमः। कृपया किमपि करोतु।

बृहस्पतिः – एक एव उपायः अस्ति।

इन्द्रः – कः स गुरुदेव ?

बृहस्पतिः – अध्यात्मशक्त्या तान् पराजेतुं शक्नुमः। किन्तु तत्रैव अस्माकं शैथिल्यम् ! *(इन्द्रः नीरवः)* कुत्र अस्माकं तत्परता ? कुत्र अस्माकं जागरूकता ? *(गत्वा मातलिं स्पृशति। मातलिः स्वस्थः उत्तिष्ठति।)*

इन्द्रः – बोधामि गुरुदेव ! यावत् अध्यात्मसिद्धिं न प्राप्नुमः तावत् कचः अस्माकं साहाय्यं कर्तुं शक्नोति। तस्य आगमनेन अस्माकं मनोबलं वर्धिष्यते। कदा स प्रत्यागच्छति ?

बृहस्पतिः – मृतसञ्जीवनीविद्या क्रीडनकं नास्ति सुरपते ! सा कस्मैचित् बालकाय दातुं न शक्यते।

इन्द्रः – तर्हि ?

बृहस्पतिः – तस्याः प्राप्तये कठोर-साधना कर्तव्या। बहवः परीक्षा दातव्याः। अतप्ततनुः, अशुद्धचित्तः तां प्राप्तुं न शक्नोति।

इन्द्रः – तर्हि कियत्कालं प्रतीक्षणीयम् ?

मातलिः – *(बहिः दृष्ट्वा शङ्कया)* कोऽपि आगच्छति। न अयं राक्षसः। *(आनन्देन)* कचकुमारः गुरुगृहात् प्रत्यागतः।

इन्द्रः – *(आनन्देन)* प्रत्यागतः ?

मातलिः – आम् देव, पश्यतु। *(कचः प्रविश्य समौनं तिष्ठति।)*

बृहस्पतिः – वत्स ! कुतस्त्वं म्लानमुखः ? किं जातम् ?

कचः – क्षाम्यतु पितः ! भवतः वचनं पालयितुं न अशकम्।

बृहस्पतिः – किं सञ्जीवनीविद्या न दत्ता ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कचः – दत्ता।

बृहस्पतिः – तर्हि ?

कचः – तया अहं कमपि जीवयितुं न शक्नोमि।

बृहस्पतिः – किमर्थम् ?

कचः – देवयान्याः अभिशापात्।

बृहस्पतिः – देवयान्याः अभिशापात् ? त्वया तस्याः किं कृतम् ? *(कचः नीरवः। बृहस्पतिः ध्यानं कृत्वा)* बोधामि। त्वया देवयान्याः कामना न पूरिता। सा किम् अकथयत् ?

कचः – सञ्जीवनीविद्यया त्वं कमपि जीवयितुं न शक्नोषि इति सा अशपत्।

इन्द्रः – कच, अपि तां विद्यां स्मरसि ?

कचः – सम्यक् स्मरामि सुरपते !

इन्द्रः – तर्हि तव विद्या न निष्फला।

कचः – कथम् ? मदर्थं तु निष्फला एव।

इन्द्रः – आम्, त्वदर्थं निष्फला। किन्तु त्वं शिक्षय कमपि । तदा सा निष्फला न स्यात्। नैवं गुरुदेव ?

बृहस्पतिः – आम् सुरपते ! किन्तु कः तां विद्यां ग्रहीतुं समर्थः ? कस्य तादृशी योग्यता ?

इन्द्रः – चिन्ता कुतः गुरुदेव ! यदा विद्या अस्ति, अध्यापनस्य इच्छा अस्ति, तदा योग्यः छात्रः आगमिष्यति। नैषा देवभूमिः सर्वथा अयोग्या।

बृहस्पतिः – वत्स ! गुरुकुले त्वया यत् तपोमयं जीवनं यापितं तत् युगे युगे विद्यार्थिभ्यः प्रेरणां ददातु। तव त्यागः, तव आदर्शः राजतु शाश्वतीः समाः।

इन्द्रः – बाधाः, प्रलोभनानि अविगणय्य देवकार्याय प्रत्यागतस्त्वम्। अभिनन्दनं ते कच ! *(देवाः पुष्पहस्ताः प्रविश्य पृष्ठतः तिष्ठन्ति।)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कचः – देवकार्यमेव मम जीवनस्य एकमात्रं लक्ष्यम्।

इन्द्रः – पश्यतु गुरुदेव ! कचस्य प्रत्यागमनेन देवगणाः कियत् प्रसन्नाः !

बृहस्पतिः – वत्स, त्वं जीवनपरीक्षायां विपुलगौरवेण उत्तीर्णः। अत्र तव प्रत्यागमनम् आसुरशक्तीनाम् उपरि दैवशक्तीनां विजयस्य शुभसङ्केतः। *(देवाः पुष्पवृष्टिं कुर्वन्ति। श्रीमातुः स्वरः श्रूयते)*

No human will can finally prevail against the Divine's Will. Let us put ourselves deliberately and exclusively on the side of the Divine and the victory is ultimately certain.

(आश्रमविद्यालये ६. ८. १९९१ दिनाङ्के प्रयुक्तम्।)

अश्वमेधः

७. ८. २००१ दिनाङ्के इदं नाटकम् आश्रमविद्यालये अभिनीतम् आसीत्। आश्रमस्य सूचनाफलके अधोलिखिता सूचना नाटकस्य कथा च प्रदत्ते आस्ताम्।

The अश्वमेधः (Horse-Sacrifice) used to be performed in ancient India by great kings to establish their supreme sovereignty. A white horse was set free for a year under the protection of the royal army who claimed for the king all the land it covered. If the horse entered another territory, the king of that territory either had to fight or submit. If the horse was not captured during the year, it was victoriously brought back to the capital accompanied by the rulers of the

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

lands it had entered. On successfully carrying out a horse-sacrifice the king could assume the title of चक्रवर्ती (universal monarch). The horse-sacrifice served not only to glorify the king but also to ensure the prosperity and fertility of the entire kingdom. Symbolically, it is the offering of the Life-power with all its impulses, desires, enjoyments to the divine existence.

The hero of the play, King Marutta, had performed अश्वमेध (Horse-Sacrifice) a 100 times. Sri Aurobindo says that he is one of the five great emperors who welded into Empire the great congeries of nations.

Ashwamedha (The horse-sacrifice)

Yudhisthira is extremely dejected after the Mahabharata war. He wants to spend his remaining days doing *tapasya* on the bank of the Ganga. Sri Krishna tries to cheer him up but fails. Then Vyasadeva advises him to perform a horse-sacrifice to get rid of his dejection and bring prosperity to the kingdom. Yudhisthira is unwilling to do it because he does not have the necessary resources. Vyasadeva tells him to go to the Himalayas and bring the gold kept by King Marutta for the purpose. Then he narrates the story of Marutta.

Brihaspati, instigated by Indra, refuses to be the priest of Marutta. Then the depressed king, advised

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

by Narada, goes to Varanasi to find Samvarta, the younger brother of Brihaspati who lives there as a mad man. Samvarta goes to the Vishwanatha temple everyday. Narada tells Marutta to put a dead body on his way. Among the passers-by the one who runs back on seeing the dead body will be recognised as Samvarta.

Marutta does not get a dead body for a long time. A wood-cutter directs him to the cremation ground. Marutta requests the corpse-burners to give him a corpse only for a day in exchange of 100 gold coins. The corpse-burners think of a plan and one of them pretends to be a corpse. But their plan fails. Finally they get the corpse of a mad man and Samvarta was found and he agrees to be the priest of the sacrifice.

Knowing of this, Brihaspati, in jealousy, provokes Indra to stop the sacrifice. Indra sends Agni to persuade Marutta to accept Brihaspati as his priest, but in vain. Furious Indra throws his thunderbolt to kill Marutta but Samvarta blocks it and renders the weapon ineffective. Being pleased with Marutta's truthfulness Samvarta tells him to ask for a boon. By Samvarta's boon Indra and Brihaspati forget their enmity and take part with all other gods in the sacrifice.

Thus Vyasadeva ends the story and sends Yudhisthira to the Himalayas to pray to Shiva and bring Marutta's gold.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Having heard the story Yudhisthira goes to the Himalayas and prays to Shiva who offers all his gold-mines. But Yudhisthira asks only for the amount required for the sacrifice. Being pleased with Yudhisthira's selfless attitude Shiva blesses him for a successful Ashwamedha sacrifice.

उपस्थापनम्

सुसायं सर्वेभ्यः ! Tonight's play, अश्वमेधः, is based on a story taken from the आश्वमेधिकपर्व of the महाभारतम्।

We know that अर्जुन, being possessed by the वैष्णव-माया, wanted to run away from the battlefield.

The same वैष्णव-माया possessed युधिष्ठिर after the war. He does not want to go back to हस्तिनापुरम्. श्रीकृष्ण, unwilling to show his विश्वरूपम् again, assigns the role of the preceptor to व्यासदेव.

During his discourse व्यासदेव asks युधिष्ठिर to perform अश्वमेधयज्ञ in order to overcome his agony and bring prosperity to the kingdom.

But from where can युधिष्ठिर get the huge resources necessary for performing the sacrifice ? व्यासदेव shows him the way and narrates the story of King मरुत्त. In the उत्तरकाण्ड of the रामायण, वाल्मीकि also speaks of मरुत्त.

Tonight's play centres round him.

Incidentally Sri Aurobindo has also written about मरुत्त in his work on the महाभारत. Speaking of the different groups that constituted the Aryan nations, he says :

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"Five distinct times had these great congeries of nations been welded into Empire, twice by the Ikshwakus under मान्धाता, son of युवनाश्व and King मरुत्त, afterwards by the हैहय अर्जुन कार्तवीर्य, again by the इक्ष्वाकु भगीरथ and finally by the कुरु भरत." SABCL 3:190

These five great rulers are described thus in the सभापर्व of the महाभारतम्। Here is Sri Aurobindo's own translation :

"Now since the virtuous ages first began
Five emperors have reigned to history known,
Maroutta, Bharat, Yuvanaswa's son,
Great Bhagirath and Kartavirya old.
By wealth Maroutta conquered, Bharat bold
By armed strength; Mandhata's victories
Enthroned him and his subtle soul and wise.
By strenuous greatness Kartavirya bent
The world, but Bhagirath beneficient
Gathered the willing nations to his sway."

Tonight's play begins on the bank of the Ganga.

प्रथमदृश्यम्

युधिष्ठिरः – किम् एष स धर्मराजः ? इदं विजयमुकुटं प्राप्तुम् एतावान् नरसंहारः ! कथम् इदं धर्मयुद्धम् ? धर्मयुद्धं वयं कुर्म इति श्रीकृष्णः अवदत्। किम् अस्माभिः सत्यं धर्मयुद्धं कृतम् ? गुरुपुत्रः अश्वत्थामा अधुनापि जीवति। स मृत इति गुरुदेवस्य सम्मुखे कथम् अवदम् ? एषा मम गुरुभक्तिः ? एषा मम धर्मपरायणता ? अधर्मी अहं हस्तिनापुरस्य सिंहासने कथम् उपविशेयम् ? राजा धर्मस्य विग्रहः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्यते, राजा परमेश्वरस्य प्रतिनिधिर् मन्यते। अहं तु तथा नास्मि। वस्तुतः मम ज्येष्ठभ्राता कर्ण एव सिंहासनस्य योग्य उत्तराधिकारी आसीत्। हा हन्त ! तादृक् महान् वीरः अस्माभिः निरस्त्रं मारितः ! इदम् अस्माकं पौरुषम् ? इदम् अस्माकं वीरत्वम् ? नहि। पापी अहम्। पापकर्मा अहम्। इयं पतितपावनी गङ्गा मम पापराशिं कदा क्षालयेत् ? अहम् अत्रैव स्थास्यामि। गङ्गातीरे कठोरतपस्यां कुर्वन् शेषजीवनं यापयिष्यामि ! *(उपविशति। पृष्ठतः वंशीध्वनिः श्रूयते।)*

श्रीकृष्णः – कौन्तय !

युधिष्ठिरः – *(उत्थाय)* केशव !

श्रीकृष्णः – नवयुगस्य अग्रणीः गङ्गाजले निजप्रतिबिम्बं पश्यन् किं चिन्तयति ? किम् अतीतं स्मरसि ?

युधिष्ठिरः – आम् केशव, अतीतं तु वर्तमानस्य प्रतिष्ठा।

श्रीकृष्णः – तत् सत्यम्। किन्तु अतीतं प्रगतिरोधकं न स्यात्। कुरुक्षेत्र-युद्धस्य आरम्भे वैष्णव-माया अर्जुनम् अग्रसत्। अहो आश्चर्यम् ! अधुना सा धर्मपुत्रं युधिष्ठिरं ग्रसति !

युधिष्ठिरः – वैष्णव-माया ?

श्रीकृष्णः – आम्। वृथा शोकेन परलोकस्थ-पितृपितामहान् मा सन्तापय।

युधिष्ठिरः – मम शोकेन परलोकस्थ-पितृपितामहाः सन्तप्ता भवन्ति ?

श्रीकृष्णः – अवश्यम्। शोकं मा कुरु। 'गतासून् अगतासूंश्च नानुशोचन्ति पण्डिताः'। अयम् आनन्दस्य विषयः यत् कुरुक्षेत्रयुद्धे कोऽपि सैनिकः पराङमुखः न मृतः। उभयपक्षयोः सर्वे सम्मुख-समरे वीरगतिं प्राप्य स्वर्गे सुखभोगं कुर्वन्ति।

युधिष्ठिरः – गोविन्द ! भवान् मयि अतीव प्रीतिमान्। सौहार्देन, प्रेम्णा मां सदा अनुकम्पसे। अहम् आत्मानं कृतकृत्यं मन्येय यदि भवान् तपोवनगमनाय अनुमतिं दद्यात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीकृष्णः – तपोवनम्? तपोवनगमनं विजयि-क्षत्रियस्य स्वधर्मो नास्ति।

युधिष्ठिरः – किन्तु अहं प्रियतमं पितामहम्, पूज्यतमं गुरुदेवम्, महावीरं ज्येष्ठभ्रातरम् अधर्मेण हत्वा शान्तिं न प्राप्नोमि, सुखं न विन्दामि। कृपया तपश्चरणाय अनुमतिं ददातु।

श्रीकृष्णः – यत् अहं कुरुक्षेत्र-युद्धस्य आरम्भे अर्जुनाय अकरवं तत् पुनः कर्तुं न शक्यते। तव इमं रोगं व्यासः अपनेष्यति।

युधिष्ठिरः – व्यासः?

श्रीकृष्णः – आम्, कृष्णद्वैपायन-व्यासः त्वां बोधयिष्यति। तं स्मर। *(प्रस्थितः)*

युधिष्ठिरः – पितामह-व्यासः बहुदिनेभ्यः न दृष्टः। तस्य सान्निध्यं मङ्गलाय भवति। *(उपविष्टः। पृष्ठतः श्रूयते –)*

ॐ व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

व्यासः – *(प्रविश्य)* एष कृष्णस्य वचनं न अशृणोत्। अहं तु कृष्णस्य अंशमात्रम्। कथम् इमं बोधयेयम्? अस्तु। *(निकटं गत्वा)* पौत्र युधिष्ठिर!

युधिष्ठिरः – *(उत्थाय)* नमोऽस्तु पितामह!

व्यासः – कल्याणमस्तु।

युधिष्ठिरः – कथयतु पितामह!

व्यासः – सर्वधर्मविशारदः, सर्वशास्त्रपारङ्गतः त्वं कथं बालवत्, मूढवत् आचरसि? मोहं त्यज।

युधिष्ठिरः – अधर्मेण स्वजनान् हत्वा . . .

व्यासः – *(उच्चैः)* अलम्। यतिवारं तव अज्ञानम् अपसारयामि ततिवारं तद् आमन्त्रयसे? अबुद्धे, कुबुद्धे, दुर्बुद्धे! मूढा आत्मानं कर्तारं मन्यन्ते। 'अहम्, मम, अहम्, मम' इति मूढा वदन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

युधिष्ठिरः – क्षाम्यतु पितामह ! भवतः कोपं सोढुं न शक्नोमि। प्रसीदतु।
व्यासः – यदि त्वम् आत्मानं पापिनं मन्यसे, यदि तव पापबुद्धिर् नापगच्छति तर्हि तस्य प्रायश्चित्तं कुरु।
युधिष्ठिरः – कथयतु कृपया येनाहं शान्तिं प्राप्नुयाम्।
व्यासः – अश्वमेधयज्ञं कुरु। यज्ञेन, दानेन, तपसा पापराशिर् नश्यति।
युधिष्ठिरः – किन्तु अधुना तत् कथं सम्भवति ?
व्यासः – कुतो नहि ?
युधिष्ठिरः – यज्ञे प्रचुरं दानं दातव्यम्। तदर्थं प्रचुरं धनम् आवश्यकम्।
व्यासः – अस्ति।
युधिष्ठिरः – कुत्र ? ये केऽपि राजानः जीवन्ति ते युद्धाय सर्वस्वं दत्त्वा दीनतां भजन्ते। तेषां युद्धपीडा अधुनापि अस्ति। कथं तान् याचेय ?
व्यासः – शुभकार्यस्य अर्थे धनस्य अभावः कुत्रापि दृष्टः ?
युधिष्ठिरः – किन्तु अस्यां स्थित्याम् उपायं न पश्यामि पितामह !
व्यासः – हिमालयं गच्छ। तत्र महाराज-मरुत्तेन स्थापितः स्वर्णराशिर् वर्तते। तेन तव धनागारं पूर्णं भविष्यति।
युधिष्ठिरः – अवश्यं गमिष्यामि। किन्तु कोऽयं महाराज-मरुत्तः ?
व्यासः – सा दीर्घा कथा। आस्स्व, कथयामि।

द्वितीयदृश्यम्

आख्याता – ततः व्यासदेवः युधिष्ठिरं महाराज-मरुत्तस्य कथाम् अकथयत् – त्रेतायुगस्य आरम्भे अविक्षित् नाम राजा आसीत्। स इन्द्रात् केनापि गुणेन अवरः न आसीत्। सर्वे राजानः तस्य वशवर्तिनः आसन्। धर्मात्मा, यज्ञशीलः सः तेजसा आदित्यतुल्यः, क्षमया पृथिवीसमः, बुद्ध्या बृहस्पतिसमानः। हिमवान् इव सुस्थिरः सः कर्मणा, मनसा, वाचा, दमेन, शमेन प्रजानां मनांसि आराधयामास। देवैरपि सुदुर्जयः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सः शतम् अश्वमेधयज्ञान् अकरोत्। स्वयम् ऋषिः अङ्गिराः तस्य पुरोहितः अभवत्।

अविक्षित्पुत्रः मरुत्तः स्वपितरं विक्रमेण गुणैश्च अतिक्रान्तवान्। किं बहुना, ससागरा पृथिवी तस्मिन् अनुरक्ता अभवत्। गुणवान्, वीर्यवान् सः सर्वदा इन्द्रेण सह स्पर्धते स्म। बहुधा प्रयतमानोऽपि इन्द्रः केनापि गुणेन तम् अतिक्रान्तुं न अशक्नोत्। एकदा . . .

नारदः – *(प्रविश्य)* नारायण, नारायण ! 'महिमा तवैव प्रभो परम जित्वर !' अद्य महाराज-मरुत्तस्य साहाय्यं कर्तव्यम्। *(घोटकस्य आगमनशब्दः)*

मरुत्तः – देवर्षे, अभिवादये।

नारदः – नारायण ! इन्द्रस्य प्रतिस्पर्धी महाराज-मरुत्तः अत्र कथम् ?

मरुत्तः – त्रिकालज्ञ-देवर्षि-नारदस्य किम् अविदितम् ? गुरुदेव-बृहस्पतेः गृहम् अगच्छम्। किन्तु दुर्भाग्यवशात् तेनाहं प्रत्याख्यातः।

नारदः – प्रत्याख्यातः ! किमर्थम् ?

मरुत्तः – तस्य निर्देशेन मया अश्वमेध-यज्ञस्य सर्वा व्यवस्था कृता। अधुना स यज्ञं कर्तुं न इच्छति।

नारदः – नारायण ! एतत् तु न उचितम्।

मरुत्तः – केवलं देवानां पुरोहितः भविष्यामि, न मनुष्याणाम् इति तस्य आग्रहः।

नारदः – यदि स देवानाम्, मनुष्याणाम्, उभयोः पुरोहितः भवति तर्हि का हानिः ?

मरुत्तः – इन्द्रस्तं न अनुमन्यते।

नारदः – नारायण, नारायण !

मरुत्तः – भवान् तु जानाति – न केवलं बृहस्पतिः, तस्य पिता महर्षिः अङ्गिरा अपि अस्माकं पुरोहितः आसीत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारदः – इन्द्रेण साधु कार्यं न कृतम्।

मरुत्तः – अधुना का मे गतिः ? कः उपायः ? कथम् अश्वमेध-यज्ञः सम्पन्नो भवेत् ? कुत्र बृहस्पतितुल्यं पुरोहितं प्राप्नुयाम् ? भवान् तु जानाति – यदि अयं यज्ञः सम्पन्नो न भवेत् तर्हि मम कुलनाशः सुनिश्चितः। *(चिन्ताकुलतां नाटयति)*

नारदः – सत्यसङ्कल्पः वृथा न भवति राजन् !

मरुत्तः – अस्ति कोऽपि उपायः ? अस्ति कोऽपि बृहस्पतितुल्यः ? कथयतु कृपया।

नारदः – अस्ति – संवर्तः।

मरुत्तः – संवर्तः ! संवर्तः कः ?

नारदः – महर्षेः अङ्गिरसः अष्ट पुत्राः – तेषु महातेजस्वी बृहस्पतिः ज्येष्ठः। तपोधनः संवर्तः अङ्गिरसः तृतीयसन्तानः।

मरुत्तः – ततः ?

नारदः – एतौ भ्रातरौ परस्परम् अतिस्पर्धिनौ आस्ताम्। बृहस्पतिः संवर्तं पुनः पुनः बाधते स्म।

मरुत्तः – ततस्ततः ?

नारदः – बृहस्पतिना भृशं पीडितः संवर्तः गृहं त्यक्त्वा वने अवसत्।

मरुत्तः – हा हन्त ! महाज्ञानी बृहस्पतिः निजभ्रातरं प्रति द्वेषं कृत्वा तं गृहात् निष्कासितवान् ! यदि स इत्थं करोति तर्हि कः अस्माकं शरणम् ? कः अस्माकम् आदर्शः ?

नारदः – सर्वान्तर्यामी, चराचरस्वामी नारायण एव अस्माकं शरणम्। स एव अस्माकम् आदर्शः। नारायण, नारायण !

मरुत्तः – देवर्षे, अधुनापि स वने वसति ?

नारदः – नहि। वाराणस्याम् उन्मत्तवत् भ्रमति।

मरुत्तः – हे भगवन् ! बृहस्पतेः लघुभ्राता वाराणस्याम् उन्मत्तवत् भ्रमति !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारदः – तत्र गच्छ। विनयेन, प्रणिपातेन, सेवया तं प्रसादय। तव मनस्कामना पूर्णा भविष्यति।

मरुत्तः – भवता अहं संजीवितः। कृपया कथयतु – कथं तं प्राप्नुयाम् ? कथं तम् अभिजानीयाम् ? स किमर्थम् उन्मत्तजीवनं यापयति ?

नारदः – संसारे अज्ञातभावेन स्थातुं तस्य अयं निर्णयः।

मरुत्तः – तर्हि तु महासमस्या। कथं तं परिचिनुयाम् ?

नारदः – अस्ति एकमात्र उपायः। सः प्रतिदिनं विश्वनाथमन्दिरं गच्छति। मन्दिरमार्गे शवमेकं स्थापय।

मरुत्तः – शवम् ?

नारदः – आम्। शवं दृष्ट्वा यः प्रतिगच्छेत् स एव संवर्तः। किन्तु त्वया एकलेन गन्तव्यम्।

मरुत्तः – गमिष्यामि देवर्षे !

नारदः – त्वया सह अन्यः कोऽपि न गच्छेत्। नारायण, नारायण ! आम्, यदि स पृच्छेत् – कस्त्वां मम निकटं प्रैषयत् ? तर्हि मम नाम कथय। एतद् अपि कथय – नारदः अग्निं प्रविष्टः।

मरुत्तः – *(आश्चर्येण)* हँ !

नारदः – नारायण, नारायण ! *(निष्क्रान्तः)*

मरुत्तः – नारदस्य नाम्ना इदम् असत्यं कथं वदेयम् ?

तृतीयदृश्यम्

(कश्चन मृतः। चतस्रः महिलाः उरस्ताडं शिरस्ताडं च क्रन्दन्ति –)

सर्वाः – अयि अयि ओ हर हरे ! कुत्र गतस्त्वम् ? कथं गतस्त्वम् ? किमर्थं गतस्त्वम् ?

प्रथमा – त्वं सङ्गीतप्रिय आसीः। सङ्गीतं त्यक्त्वा कुत्र गतस्त्वम् ? कथं गतस्त्वम् ? किमर्थं गतस्त्वम् ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वाः – अयि अयि ओ हर हरे ! अयि अयि ओ हर हरे !

द्वितीया – त्वम् इट्लिप्रिय आसीः। इट्लिं त्यक्त्वा कुत्र गतस्त्वम् ? कथं गतस्त्वम् ? किमर्थं गतस्त्वम् ?

सर्वाः – अयि अयि ओ हर हरे ! अयि अयि ओ हर हरे !

तृतीया– त्वं पायसप्रिय आसीः। मम हस्तरन्धितं पायसं त्यक्त्वा कुत्र गतस्त्वम् ? कथं गतस्त्वम् ? किमर्थं गतस्त्वम् ?

सर्वाः – अयि अयि ओ हर हरे ! अयि अयि ओ हर हरे !

चतुर्थी– त्वं लड्डुकप्रिय आसीः। लड्डुकं त्यक्त्वा कुत्र गतस्त्वम् ? कथं गतस्त्वम् ? किमर्थं गतस्त्वम् ?

सर्वाः – अयि अयि ओ हर हरे ! अयि अयि ओ हर हरे !

मरुत्तः – *(स्वगतम्)* भाग्यस्य का विडम्बना ? शोकार्तगृहे कथं याचनां कुर्याम् ?

गृहस्वामिनी – भवान् किम् इच्छति ? कथयतु। अतिथिर् देवतुल्यः। भवतः सत्कारेण दिवं गतस्य आत्मनः परमकल्याणं भवेत्।

मरुत्तः – आर्ये, तव द्वारे अहम् अतिथिर्नास्मि, भिक्षार्थी अपि नास्मि।

गृहस्वामिनी – तर्हि अस्माकं दुर्दिने अत्र आगमनस्य उद्देश्यम् ?

मरुत्तः – यदि भवती शतस्वर्णमुद्राणां विनिमयेन दिनमेकं मृतदेहं दद्यात् तर्हि महान् उपकारः स्यात्।

गृहस्वामिनी – किम् ? संसारे कोऽपि शवविक्रयं करोति ? अनार्य, पामर !

मरुत्तः – विशेषकारणात्, निःस्वार्थभावनया इमां भिक्षां याचितुं विवशः अस्मि !

गृहस्वामिनी – ओऽ, बोधामि, त्वमसि मनुष्यरूपधारि-पिशाचः। तिष्ठ, आगच्छामि। *(उच्चैः)* अरे, कोऽस्ति ? सम्मार्जनीम् आनय। *(निष्क्रान्ता। पुनः उच्चैः क्रन्दनं श्रूयते –)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वाः – अयि अयि ओ हर हरे ! अयि अयि ओ हर हरे !

चतुर्थदृश्यम्

मरुत्तः – *(गच्छन् चिन्तयति)* दिनानि गतानि। सप्ताहा गताः। मासा गताः। कोऽपि शवं न ददाति। अनार्य, पामर, पिशाच इति भर्त्सनं कियत्कालं शृणुयाम् ? तृषा भवति। जलं कुत्र अस्ति ? *(कोऽपि वृद्धः काष्ठभारं वहन् आगच्छति। तम् उपगम्य)* महाशय, कुत्र जलं प्राप्नुयाम् ?

वृद्धः – अत्र जलं नास्ति। अग्रे गच्छ। अस्याः गोचरभूमेः परं दक्षिणतः श्मशानम् अस्ति। तत्र तव आशा पूर्णा भविष्यति।

मरुत्तः – भवन्तं भारं वहन्तं दृष्ट्वा मम दुःखं भवति। काष्ठभारं मह्यं ददातु।

वृद्धः – वत्स, तव भारं कः वक्ष्यति ?

मरुत्तः – मम भारः ? अहं तु भारं न वहामि।

वृद्धः – अवश्यं वहसि वत्स ! अवश्यं वहसि।

मरुत्तः – कुत्र ?

वृद्धः – त्वं चिन्ताभारं न वहसि ? अनेन मार्गेण गच्छ। भगवान् तव मङ्गलं करोतु।

मरुत्तः – एष शुभेच्छु-काष्ठवाहकः मम मनोगतं कथम् अजानात् ? श्मशानभूमिः ! *(वृद्धम् अन्विष्यति। तं न प्राप्य)* कुत्र सः ? आश्चर्यम् ! हे भगवन्, किं श्मशानभूमौ मम आशा पूर्णा भविष्यति ?

पञ्चमदृश्यम्

(श्मशानभूमिः। चत्वारः शवदाहकाः गञ्जसेवनाय उपविष्टाः परस्परम् आलपन्ति।)

प्र. शवदाहकः – कियत् दलयसि ? देहि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयः – हर हर वम्।
सर्वे – वम् शम्भो !
तृतीयः – हर हर वम्।
सर्वे – वम् शम्भो !
द्वितीयः – सर्वं गृह्णासि। देहि मह्यम्।
प्रथमः – तृप्तिर्न भवति।
तृतीयः – *(आवेष्टनात् निष्कास्य)* पुनः करोमि।
द्वितीयः – नहि। श्वःकृते स्थापय।
प्रथमः – अरे, अद्य तृप्तो भव। श्वस्तन-चिन्तां मुञ्च। श्वः जीवामः न वा कः जानाति ?
द्वितीयः – अद्य एकोऽपि शवः नागतः। यदि श्वः नागच्छेत् ? धनं प्राप्स्यामः कुतः ?
तृतीयः – बहवः जनाः वाराणस्यां मर्तुम् आगताः। कुतस्ते प्रतिदिनम् एकैकं न म्रियन्ते ?
चतुर्थः – किं यमराजस्य मस्तकं कार्यं न करोति ?
तृतीयः – तदेव चिन्तयामि। अन्यथा सः अस्माकं दुःखं कथं न बोधति ?
द्वितीयः – निर्धनजीवनं मरणात् अधिकं कष्टकरम्।
तृतीयः – आम्। मरणे अल्पकालं कष्टम्। निर्धनस्य पदे पदे कष्टम्।
प्रथमः – अरे पश्य। कोऽपि आगच्छति।
तृतीयः – क एषः ?
चतुर्थः – अत्र किम् इच्छसि ?
मरुत्तः – एकस्य दिनस्य अर्थे शवः दातुं शक्यते ?
प्रथमः – किमर्थम् ? शवेन किं करिष्यसि ?
मरुत्तः – अहं शतं स्वर्णमुद्राः दास्यामि।
तृतीयः – शतं स्वर्णमुद्राः ! किन्तु कः शवं दास्यति ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमः – देहि। वयं यत्नं करिष्यामः। यदि शवं प्राप्नुमः तर्हि कुत्र दातव्यम् ?

मरुत्तः – विश्वनाथमन्दिरात् किञ्चित् दूरे विशालवटवृक्षस्य निकटे एका अतिथिशाला अस्ति।

सर्वे – आम् आम्, अस्ति।

मरुतः – तत्र अहं वसामि। प्रभातात् पूर्वम् आगन्तव्यम्। शवः अतिथिशालायाः मन्दिरस्य च मध्यवर्ति-मार्गे स्थापनीयः।

तृतीयः – अस्तु। *(मरुत्तः निष्क्रान्तः)*

द्वितीयः – वद, स्वर्णमुद्रास्तु प्राप्ताः। किन्तु कस्तुभ्यं शवं दास्यति ?

प्रथमः – चिन्तयामि।

तृतीयः – चिन्तयामि।

चतुर्थः – चिन्तयामि।

द्वितीयः – *(एकैकं प्रति)* चिन्तय, चिन्तय, चिन्तय। गभीरं चिन्तय। दिवारात्रं चिन्तय।

प्रथमः – मम एकः विचारः स्फुरितः।

द्वितीयः – इयत् शीघ्रम् ?

प्रथमः – अरे, किं मन्यसे माम् ?

द्वितीयः – गर्दभः।

प्रथमः – किम् ? *(ताडयितुम् उद्यतः)*

द्वितीयः – अस्तु, अस्तु। वद।

प्रथमः – स महाशयः एकस्य दिनस्य अर्थे शवम् इच्छति। नैवम् ?

तृतीयः – आम्। तदेव तु तेन कथितम्। *(कासति)*

प्रथमः – अहं शवो भविष्यामि।

चतुर्थः – उत्तमम्।

द्वितीयः – एकस्य दिनस्य अर्थे अहम् अपि शवो भवितुं शक्नोमि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमः – नहि। एषा मम बुद्धिः। अहं भविष्यामि। अहं स्वर्णमुद्राः अर्धं ग्रहीष्यामि।

द्वितीयः – आम् आम्। यः शवो भवेत् सः अर्धं गृह्णीयात्।

तृतीयः – त्वं न भविष्यसि। *(कासति)*

द्वितीयः – किमर्थम् ?

तृतीयः – यतो हि त्वं वारंवारं शौचाय गच्छसि।

प्रथमः – त्वमपि न भविष्यसि।

तृतीयः – किमर्थम् ?

प्रथमः – यतो हि त्वं वारंवारं खुँ खुँ करोषि।

चतुर्थः – अहं भविष्यामि।

प्रथमः – हेः ! चपलः, चञ्चलः, वाचालः कथयति – 'अहं भविष्यामि'। त्वया अत्रैव स्थातव्यम्।

तृतीयः – आम्, त्वं नूतनः। अत्रैव तिष्ठ।

द्वितीयः – चिन्तां मा कुरु। अर्धस्य तृतीयांशं प्राप्स्यसि।

चतुर्थः – न बोधामि।

द्वितीयः – अरे वैशाखनन्दन ! यः शवो भवति, सः अर्धं प्राप्नोति। अवशिष्टम् अर्धं वयं त्रयः समानभागं कृत्वा ग्रहीष्यामः।

चतुर्थः – *(चिन्तयित्वा)* अधुना बोधामि।

तृतीयः – खरनन्दनः ! चल।

षष्ठदृश्यम्

तृ. शवदाहकः – तत्र मन्दिरम्। तत्र अतिथिशाला। अत्र अस्माभिः स्थातव्यम्। *(प्रथमं प्रति)* त्वं तत्र इदं वस्त्रं धारयित्वा स्वपिहि। *(द्वितीयं प्रति)* त्वं तत्र तिष्ठ। अहम् अत्र तिष्ठामि।

द्वितीयः – *(प्रथमं प्रति)* शीघ्रं कुरु। कोऽपि पश्येत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमः – रात्रिः अधुनापि अस्ति। मार्गे कोऽपि नास्ति। *(द्वौ रक्षिपुरुषौ आगच्छतः।)*

प्र. रक्षिपुरुषः – *(दूरात्)* सावधानं भोः !

द्वितीयः – हे ! रक्षिपुरुष आगच्छति ! *(द्वौ शवदाहकौ लुक्कायेते। प्रथमः शवदाहकः मार्गप्रान्ते स्वपिति।)*

प्र. रक्षिपुरुषः – अधिकारिन् ! पश्यतु। मार्गप्रान्ते कोऽपि स्वपिति।

द्वि. रक्षिपुरुषः – मद्यपः स्यात्। पश्य।

प्र. रक्षिपुरुषः – *(पादेन प्रहरन्)* उत्तिष्ठ। शयनार्थं स्थानं न प्राप्तम् ? अरे, किम् एष मृतः ? पश्यामि। *(परीक्ष्य)* अधिकारिन् ! एष मृतः।

द्वि. रक्षिपुरुषः – मृतः ? कथं मृतः ? *(परीक्ष्य)* सर्वनाशः ! मन्दिरमार्गे शवः ? अरे वाहनं शीघ्रम् आनय। प्रभातात् पूर्वम् इमं गङ्गायां क्षेप्स्यावः। अन्यथा आवयोः वृत्तिर् गमिष्यति। कथम् एष मृतः ? कः अमारयत् ? *(प्रथमः शवदाहकः उत्तिष्ठति। प्र.रक्षिपुरुषः आश्चर्येण)*

प्र. रक्षिपुरुषः – हँ ! किम् एतत् ! अधिकारिन् ! पश्यतु। शवः उत्तिष्ठति ! भू. .भू. .भूतः !

द्वि. रक्षिपुरुषः – एष न मृतः ! कथं न मृतः ? अधुना मरिष्यति। *(मारयितुं गच्छति। शवदाहकः पलायते।)*

सप्तमदृश्यम्

(श्मशानभूमिः। चतुर्थः शवदाहकः व्याकुलतां नाटयन् पादचारं करोति।)

च. शवदाहकः – किं जातम् ? कुतस्ते नागच्छन्ति ? *(द्वितीय-तृतीय-शवदाहकौ धावन्तौ प्रविशतः।)*

तृ. शवदाहकः – भाग्येन आवां रक्षितौ। न जाने, तस्य किम् अभवत्।

प्र. शवदाहकः – *(धावन् प्रविश्य)* बन्धो, अहम् अल्पेन रक्षितः। अन्यथा अद्य वयं सर्वे कारागारे अभविष्याम।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वि. शवदाहकः – मम मतेन तस्य स्वर्णमुद्राः निवर्तनीयाः।

तृ. शवदाहकः – आम्। कार्यम् अकृत्वा धनग्रहणं पापम्। *(पृष्ठतः श्रूयते– हरिनाम सत्यमस्ति, हरिं भज। हरिं भज, हरिं भज, हरिं भज।)*

च. शवदाहकः – *(आनन्देन)* हरिनाम श्रूयते। शवः आगच्छति। *(पृष्ठतः श्रूयते – हरिनाम सत्यमस्ति, हरिं त्यज। हरिं त्यज, हरिं त्यज, हरिं त्यज।)*

प्र. शवदाहकः – हरिं त्यज ! *(शृणोति।)* *(पृष्ठतः श्रूयते – हरिनाम सत्यमस्ति, हरिं त्यज। हरिं त्यज, हरिं त्यज, हरिं त्यज।)*

प्र. शवदाहकः – विचित्रं श्रूयते !

तृ. शवदाहकः – आम्। एवं तु कोऽपि न वदति !

प्र. शवदाहकः – किं पागला आगच्छन्ति ?

तृ. शवदाहकः – मन्ये। *(गत्वा एकं पागलं प्रति)* अयि भ्रातः, को मृतः ?

प्र. पागलः – अहम्। *(चतुर्थः शवदाहकः शवं द्रष्टुं निर्गतः।)*

प्र. शवदाहकः – *(आश्चर्येण)* त्वं तु जीवसि !

द्वि. पागलः – तर्हि त्वं मृतः।

प्र. शवदाहकः – आम्। अहम् अधुनैव मृत आसम्। त्वं कथम् अजानाः ?

च. शवदाहकः – *(प्रविश्य)* मया दृष्टम् – नन्दुपागलः मृतः !

द्वि. शवदाहकः – भ्रातरः, अत्र दाहकार्यस्य अर्थे शुल्कं दातव्यम्।

द्वि. पागलः – शुल्कम् ?

प्र. शवदाहकः – आम्। एका स्वर्णमुद्रा दातव्या।

द्वि. शवदाहकः – अन्यथा श्मशानस्वामी अस्माकं वेतनात् ग्रहीष्यति।

द्वि. पागलः – शुल्कं तव गृहे दत्तम्।

द्वि. शवदाहकः – शुल्कं मम गृहे दत्तम् ! एतौ सत्यं पागलौ ! अरे दण्डम् आनय।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्र. शवदाहकः – तिष्ठतम्। दण्डम् आनयामि।

प्र. पागलः – नन्दो ! एभ्यः शुल्कं देहि। *(शुल्कं देहि, शुल्कं देहि इति रटन्तौ पलायेते।)*

तृ. शवदाहकः – *(आनन्देन)* शवः प्राप्तः। हे भगवन् ! अनन्ता तव कृपा।

द्वि. शवदाहकः – शवस्तु प्राप्तः। किन्तु तं मन्दिरमार्गे कथं स्थापयिष्यामः ? यदि रक्षिपुरुषः पुनः पश्येत् ?

तृ. शवदाहकः – अधुना न गमिष्यामः। प्रभाते, मन्दिरस्य उद्घाटनात् किञ्चित् पूर्वं तत्र प्राप्स्यामः।

प्र. शवदाहकः – तत् साधु। शवनिकटे अस्मान् दृष्ट्वा यदि जनाः सन्देहं कुर्युः ?

तृ. शवदाहकः – चिन्तां मा कुरु। तस्य उपायः मया चिन्तितः।

अष्टमदृश्यम्

(विश्वनाथस्य स्तुतिः श्रूयते। रङ्गमञ्चे प्रकाशः। भक्ताः मन्दिरं गच्छन्ति। शवः रङ्गमञ्चात् बहिरस्ति। द्वौ शवदाहकौ सन्न्यासिवेषेण रङ्गमञ्चे उपविश्य जपं कुरुतः। मध्ये मध्ये शवं पश्यतः।)

जय शिव शङ्कर जय अभयङ्कर जय विश्वेश्वर पाहि माम् ।
जय हर शङ्कर जय गिरिजेश्वर जय गङ्गाधर रक्ष माम् ॥
जय जय शङ्कर, जय अभयङ्कर। जय जय शङ्कर, जय अभयङ्कर ॥
जय प्रमथाधिप जय प्रणताश्रित जय त्रिपुरान्तक पाहि माम् ।
जय महेश्वर जय परमेश्वर जय अखिलेश्वर रक्ष माम् ॥
जय जय शङ्कर, जय अभयङ्कर। जय जय शङ्कर, जय अभयङ्कर॥

मरुत्तः – भाग्येन शवः प्राप्तः। अद्य मम परीक्षायाः अन्तिम-चरणम्। हे विश्वनाथ, पाहि माम्। *(संवर्तः आगत्य शवं दृष्ट्वा निवर्तते। मरुत्तः संवर्तस्य पृष्ठतः गच्छति। संवर्तः मरुत्ते धूलिम् उपलं च क्षिपति।)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संवर्तः – मां किमर्थम् अनुसरसि ? प्रतिगच्छ।

मरुत्तः – भवान् मम गुरोः अङ्गिरसः पुत्रः। भवन्तं त्यक्त्वा कथं प्रतिगच्छेयम् ?

संवर्तः – किम् ? कस्त्वाम् अकथयत् ? कथं मां जानासि ? सत्यं वद। तव सर्वे मनोरथाः पूर्णाः भविष्यन्ति। यदि असत्यं वदसि तर्हि तव मस्तकं शतधा स्फुटिष्यति।

मरुत्तः – हे तपोधन ! देवर्षि-नारदः माम् अत्र प्रैषयत्।

संवर्तः – देवर्षि-नारदः ! कुत्र सः ?

मरुत्तः – मां कथयित्वा सः अग्निं प्रविष्टः।

संवर्तः – नारदः अग्निं प्रविष्टः। हा हा हा। नारदः अग्निं प्रविष्टः। *(मरुत्तः असत्यभाषणात् भयं नाटयति।)* त्वं भयं करोषि ? तव मस्तकं शतधा न स्फुटिष्यति।

मरुत्तः –किन्तु, किन्तु मया असत्यं भाषितम्। नारदः माम् अवदत्। तस्य अग्निप्रवेशः मया न दृष्टः।

संवर्तः – नारदः स्थूलाग्नौ न प्रविष्टः। स आत्माग्नौ प्रविश्य, कलङ्कान् दग्ध्वा, शुद्धतरः संजातः। किन्तु त्वं किम् इच्छसि ? कस्तव परिचयः ?

मरुत्तः – अहम् अविक्षित्पुत्रः मरुत्तः।

संवर्तः – राजन् ! भवान् अनेन वेषेण ?

मरुत्तः – राज्यस्य समृद्धये, प्रजानां मङ्गलाय अश्वमेध-यज्ञं कर्तुकामोऽहं भवन्तं नेतुम् आगतः।

संवर्तः – यज्ञे मम किं कार्यम् ?

मरुत्तः – भवान् पुरोहितः भवतु।

संवर्तः – न पश्यसि ? अहम् उन्मत्तः, निःस्वः, शरीरमात्रं मे अवशिष्टम्। अहं तव यज्ञं कथं कुर्याम् ? बृहस्पतिं कथय।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मरुत्तः – इन्द्रेण स निषिद्धः।

संवर्तः – ज्येष्ठभ्रातुः बृहस्पतेः अनुमतिं विना अहं यज्ञं कर्तुं न शक्नोमि। स मम पूज्यतमः।

मरुत्तः – महात्मन्! मया गुरुदेव-बृहस्पतिः श्रद्धाभक्तिपूर्वकम् उपगतः। किन्तु तेन अवज्ञापूर्वकं कथितम् – देवानां गुरुरहं मरणधर्मिमनुष्याणां पुरोहितः न भविष्यामि। भवान् अन्यं पुरोहितं करोतु। ब्रह्मन्, इन्द्रः मया सह स्पर्धते। स मां प्रति ईर्ष्यां करोति। अस्यां स्थित्यां बृहस्पतिं पुनः कथम् उपगच्छेयम् ?

संवर्तः – राजन्, यदि अहं यज्ञं कुर्यां तर्हि इन्द्र-बृहस्पती क्रुद्धौ भविष्यतः। मां प्रति द्वेषं करिष्यतः। तदा कः मम रक्षां करिष्यति ?

मरुत्तः – अहं करिष्यामि ब्रह्मन्!

संवर्तः – कथं विश्वासं कुर्याम् ? मनुष्याः स्वार्थपराः। यदि बृहस्पतिः आगत्य कथयेत् – महाराज मरुत्त, इन्द्रेण मतिः परिवर्तिता। तेन अनुमतः अहं भवतः यज्ञं कर्तुम् आगतः। तदा किं करिष्यसि ?

मरुत्तः – ब्रह्मन्, अहम् अविक्षित्पुत्रः सम्राट् मरुत्तः ईश्वरं साक्षीकृत्य शपथं करोमि – यदि अहं विप्रवरं संवर्तं त्यजेयं तर्हि मम शुभा गतिर् न स्यात्। यावत् सूर्यस्तपति, यावत् पर्वतास्तिष्ठन्ति, तावत् अहम् उत्तमलोकान् न प्राप्नुयाम्। तावत् मम बुद्धिर् नश्येत्, तावत् अहं सांसारिक-विषयेषु बद्धः स्याम्।

संवर्तः – अलम्। सन्तुष्टोऽहम्। करिष्यामि प्रियं तव।

मरुत्तः – ब्रह्मन्, मम एकः प्रश्नः।

संवर्तः – पृच्छ।

मरुत्तः – भवान् महान् तपस्वी। कुतो भवान् शवं दृष्ट्वा पृष्ठतः पलायितः ?

संवर्तः – *(हसन्)* कथयामि। शवः मृत्युसूचकः। अहं मृत्युं जेतुम् इच्छामि। शवं दृष्ट्वा पृष्ठतः पलायनम् इति अहम् अधुनापि मृत्युं जेतुं न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समर्थः। मम प्रकृतिः स्वतः माम् एतत् सूचयति। यदाहं मृत्युं जेष्यामि तदा शवम् अतिक्रम्य अग्रे गमिष्यामि।

मरुत्तः – *(प्रणमन्)* धन्योऽहं भवन्तं प्राप्य।

नवमदृश्यम्

(इन्द्रसभा। अप्सराः नृत्यं कुर्वन्ति। इन्द्रः, अग्निः, गन्धर्वराजः नृत्यं पश्यन्ति। बृहस्पतिम् आगच्छन्तं दृष्ट्वा इन्द्रः 'अलम्' इति कथयित्वा नृत्यं रोधयति। नर्तक्यः प्रणमन्त्यः निर्गच्छन्ति।)

इन्द्रः – असमये गुरुदेवस्य आगमनम् ! किं स्यात्। *(बृहस्पतिं प्रति)* नमोऽस्तु गुरुदेव !

बृहस्पतिः – देवेन्द्र, मरुत्तः अश्वमेध-यज्ञम् अचिरं करोति। संवर्तः तस्य पुरोहितः। अहम् इच्छामि – संवर्तः यज्ञं न कुर्यात्।

इन्द्रः – गुरुदेव ! भवान् तु अमरः। मरणशील-संवर्तः भवतः किं करिष्यति ?

बृहस्पतिः – देवराज, यदि यज्ञः सम्पन्नो भवेत् तर्हि त्वं स्वर्गराज्यं हारयिष्यसि।

इन्द्रः – नहि ! नहि, गुरुदेव ! भवान् निश्चिन्तस्तिष्ठतु। अहं तस्य व्यवस्थां करोमि।

बृहस्पतिः – कल्याणमस्तु। *(निष्क्रान्तः)*

इन्द्रः – जातवेदः !

अग्निदेवः – आज्ञापयतु देव !

इन्द्रः – त्वं मरुत्तं गत्वा कथय – इन्द्र इच्छति, बृहस्पतिः पुरोहितः भवतु। स त्वाम् अमरं करिष्यति।

अग्निदेवः – यथाज्ञा देवराज ! *(निष्क्रान्तः)*

इन्द्रः – हुंः ! मरुत्त, त्वं देवलोकं प्राप्तुम् इच्छसि ? असम्भवम्। एतु गन्धर्वराज !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दशमदृश्यम्

(मरुत्तः संवर्तः च उपविष्टौ।)

प्रहरी – *(प्रणम्य)* अग्निदेवः भवन्तं द्रष्टुकामः।

मरुत्तः – अग्निदेवः! अहं गच्छामि। अभिवादये अग्निदेवम्। आगम्यताम्।

अग्निदेवः – राजन्, भवतः सत्कारेण प्रसन्नोऽस्मि। अहम् इन्द्रस्य दूतरूपेण आगतः।

मरुत्तः – अपि देवराजः अस्मासु प्रीतिमान्?

अग्निदेवः – अवश्यम्। देवराजः अतीव प्रसन्नः। स भवता सह मित्रतां कर्तुम् इच्छति। किन्तु तस्य एकः अनुरोधः।

मरुत्तः – अनुरोधः?

अग्निदेवः – आम् राजन्! बृहस्पतिः यज्ञस्य पुरोहितो भवतु। सर्वे देवाः भवतः यज्ञे भागं ग्रहीष्यन्ति। भवान् अमरः भविष्यति।

मरुत्तः – मम अमरत्वेन राज्यस्य प्रजानां वा को लाभः? गुरुदेव-बृहस्पतिः अस्माकं श्रद्धा-भक्तिभाजनम्। किन्तु देवानां पुरोहितः सः मरण-धर्मि-मनुष्याणां यज्ञं कृत्वा निजगौरवं कुतः नाशयेत्?

अग्निदेवः – महाराज, पुनरपि विचारयतु। एषः अवसरः पुनर्न आगमिष्यति। भवान् स्वर्गस्य सर्वेषु लोकेषु स्वच्छन्दं स्थातुम् अर्हति। भवान् अनन्तकालं स्वर्गे सुखभोगं कर्तुं शक्नोति। अमरत्वं सामान्यवस्तु नास्ति राजन्!

मरुत्तः – नेच्छामि तत्। अग्निदेव, प्रतिज्ञाबद्धोऽहम्। एष महात्मा संवर्त एव पुरोहितः भविष्यति।

अग्निदेवः – पुनरपि विचारयतु।

संवर्तः – पावक! इतः परं यदि त्वं किमपि वदेः तर्हि त्वां क्रोधाग्निना भस्मसात् करिष्यामि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्निदेवः – नहि, नहि ! *(भयेन पृष्ठतः अपसरति)*

गन्धर्वः – *(आकाशात्)* महाराज मरुत्त, अभिमानिन्, देवद्रोहिन्, त्वया इन्द्रस्य प्रस्तावः प्रत्याख्यातः। तस्य परिणामं पश्य। अत्र इन्द्रः वज्रहस्तः प्रतीक्षते। बृहस्पतिं पुरोहितं कुरु। अन्यथा तव मृत्युः सुनिश्चितः।

मरुत्तः – कस्त्वम् ?

गन्धर्वः – अहं गन्धर्वराजः। यदि त्वं जीवितुम् इच्छसि तर्हि इन्द्रस्य वचनं पालय। अन्यथा पश्य, स वज्रप्रहारं कर्तुम् उद्यतः।

मरुत्तः – गन्धर्वराज, बृहस्पतिः इन्द्रस्य यज्ञं करोतु। अयं तपोधनः संवर्तः मम यज्ञं करिष्यति।

गन्धर्वः – सावधानं मरुत्त !

मरुत्तः – विप्रवर, इन्द्रः वज्रं क्षिपति। अधुना उपायः ?

संवर्तः – इन्द्रं शरणं गच्छ।

मरुत्तः – नहि। भवान् एव शरणम्। *(मरुत्तं रक्षितुं संवर्तः तस्य सम्मुखे तिष्ठति।)*

गन्धर्वः – अपसर संवर्त !

संवर्तः – राजन्, भयं मा कुरु। अहं स्तम्भिनी-विद्यायाः प्रयोगं करोमि। पश्य।

इन्द्रः – मरुत्त ! *(वज्रघोषः)*

एकादशदृश्यम्

(गङ्गायाः तीरे)

युधिष्ठिरः – ततः किम् अभवत् ?

व्यासः – ततः संवर्तः स्तम्भिनीविद्यायाः प्रयोगम् अकरोत्। मन्त्रबलेन स इन्द्रस्य वज्रं निष्फलम् अकरोत्।

युधिष्ठिरः – ततः ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यासः – ततः संवर्तः मरुत्तम् अकथयत् – राजन्, अहं त्वयि अतीव प्रसन्नः। वरं वृणीष्व। कथय – तव काम् इच्छां पूरयेयम् ?

युधिष्ठिरः – मरुत्तः कं वरम् अवृणोत् ?

व्यासः – सः अकथयत् – ब्रह्मन्, अहम् इच्छामि – इन्द्रः विद्वेषं त्यक्त्वा सर्वैः देवैः सह अस्माकं यज्ञे भागं गृह्णातु।

युधिष्ठिरः – इन्द्रः सर्वैः देवैः सह मरुत्तस्य यज्ञे भागम् अगृह्णात् ?

व्यासः – न केवलं भागम् अगृह्णात्, स यज्ञस्य सर्वां व्यवस्थाम् अकरोत्। तत्परं मरुत्तः संवर्तश्च इन्द्रसभायाः सदस्यौ अभवताम्।

युधिष्ठिरः – एवम् ? अहो इन्द्रस्य महत्ता ! देवाः, मनुष्याः सम्मिल्य यज्ञम् अकुर्वन् ?

व्यासः – करणीयम् एव। मन्त्रस्य प्रभावः अव्यर्थः।

युधिष्ठिरः – अस्माकं पूर्वजानाम् ईदृक् तपोबलम् आसीत् ? तैः देवाः पराजिताः !

व्यासः – तेषां वंशधरा वयं तेभ्यः योग्यतरा भवेम।

युधिष्ठिरः – यज्ञात् परं मरुत्तः अवशिष्टं स्वर्णं कुत्र अस्थापयत् ?

व्यासः – हिमालये मुञ्जवान् नाम पर्वतः अस्ति यत्र उमापतिः शिवः नित्यं तपस्यां करोति। तत्र गत्वा महादेवं भक्तिभावेन प्रणम। तस्य स्तुतिं कुरु। महादेवस्य प्रसादात् अश्वमेध-यज्ञस्य अर्थे तव धनाभावः न भविष्यति।

युधिष्ठिरः – करिष्यामि पितामह !

व्यासः – साधु। तव मुखात् एतदेव श्रोतुं मया इयती प्रतीक्षा कृता।

युधिष्ठिरः – भवतः प्रसादेन मम मोहः नष्टः। अधुना अहं स्वकर्तव्यं बोधामि। अद्यैव हिमालयं गमिष्यामि। भवतः आशीर्वादं कामये। *(प्रणमति)*

व्यासः – कृतार्थो भूयाः। शुभास्ते पन्थानः सन्तु।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वादशदृश्यम्

(हिमालये महादेवः ध्यानस्थः)

युधिष्ठिरः – नगाधिराज-हिमालयस्य इदं स्थानं कियत् मनोहरम्! अपूर्वः परिवेशः। शीतं नास्ति। उष्णं नास्ति। आश्चर्यम्! अत्र दुःखं नास्ति। दुश्चिन्ता नास्ति। क्षुधा नास्ति। तृषा अपि नास्ति। हृदये अभूतपूर्वां शान्तिम् अनुभवामि। किम् एष महादेवस्य तपोभूमिप्रभावः? सर्वत्र स्वर्णम्, स्वर्णम्, स्वर्णम्! कियन्तः स्वर्णखनयः! स्वर्णाभया चतुर्दिशम् उद्भासते। *(ध्यानस्थः। शिवस्य स्तुतिः श्रूयते –)*

ईशानं शङ्करं शर्वं शिवं विश्वेश्वरं भवम् ।
प्रणम्य प्राञ्जलिः शम्भुं प्रयामि शरणं हरम् ॥
भक्तानां सुलभं त्वां हि प्रकृतेः परतः स्थितम् ।
नमामि सर्वलोकस्थं व्रजामि शरणं शिवम् ॥

शिवः – वत्स युधिष्ठिर! अस्मिन् दुर्गमस्थाने कथं तव आगमनम्?

युधिष्ठिरः – भगवन्, महामुनि-वेदव्यासेन आदिष्टोऽहम् अत्र आगतः।

शिवः – अभीष्टं प्रकाशय।

युधिष्ठिरः – देव, समाप्तं कुरुक्षेत्र-युद्धम्। आ सागरं भूखण्डं प्राप्यापि नास्ति मे शान्तिः, नास्ति मे सुखम्। श्रीकृष्णस्य वचनेन आत्मग्लानिर् नापगच्छत्। ततः व्यासदेवेन अश्वमेध-यज्ञाय प्रेरितोऽहम्। *(शिवः प्रसन्नमुखः)* देव, अस्य यज्ञस्य किम् आन्तरिकं रहस्यम्?

शिवः – अश्वमेध-यज्ञस्य आन्तरिकं रहस्यं ज्ञातुम् इच्छसि?

युधिष्ठिरः – आम् देव!

शिवः – युद्धजयी राजा विशालं साम्राज्यम्, प्रभूतम् ऐश्वर्यं प्राप्य उद्धतः, निरङ्कुशः भवितुं शक्नोति। अतः तस्य आत्मशुद्धिः आवश्यकी।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अश्वमेध-यज्ञे सः स्वप्राणशक्तेः सर्वम् आवेगम्, कामनां वासनां च आहुतिरूपेण अर्पयति।

युधिष्ठिरः – अनुगृहीतोऽस्मि। किन्तु देव, यज्ञकार्याय . . .

शिवः – राजन्! मनोगतं प्रकाशय। मत् याचितुं लज्जसे ? परितः पश्य। यत् यत् स्वर्णं पश्यसि, तत् सर्वं तुभ्यं ददामि।

युधिष्ठिरः – नहि भगवन्, व्यासदेवेन कथितम् – अत्र महाराज-मरुत्तः यावत् स्वर्णं स्थापितवान् तावत् मम यज्ञकार्याय पर्याप्तं भवेत्। तावन्मात्रं ददातु कृपया। अधिकं नेच्छामि।

शिवः – धर्मराज, तव निर्लोभगुणेन परितुष्टोऽस्मि। महाराज-मरुत्तोऽपि लोभशून्य आसीत्। निरहङ्कारभावेन धनस्य सदुपयोगं कृत्वा सः अवशिष्टं धनं मह्यं प्रत्यर्पयत्।

युधिष्ठिरः – धन्यः स महात्मा यस्य त्यागेन अहम् उपकृतो भवामि। भवतः अनुग्रहेण मम मनस्कामना पूर्णा। नमोऽस्तु देव! *(बृहस्पतिः, इन्द्रः, अग्निः गन्धर्वराजश्च पुष्पहस्ताः प्रविष्टाः।)*

शिवः – स्वस्ति। पश्य, प्रसन्ना देवाः यज्ञे भागं ग्रहीतुं समागताः। वत्स, तव यज्ञकार्यं सुसम्पन्नं भूयात्। ॐ *(देवाः पुष्पवृष्टिं कुर्वन्ति। पृष्ठतः श्रूयते)*

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥

ऋग्वेदः १०. ९०. १६

देवाः यज्ञेन यज्ञम् अयजन्त (देवाः यज्ञपुरुषेण परमात्मना सृष्टियज्ञम् अकुर्वन्)। तानि धर्माणि प्रथमानि आसन् (ते यज्ञरूपाः धर्माः प्रधानाः अभवन्)। [ये तान् यज्ञधर्मान् आचरन्ति] ते ह (खलु) महिमानः (महिमशालिनः महात्मानः सन्तः) नाकं (स्वर्गं) सचन्त (प्राप्नुवन्ति) यत्र पूर्वे साध्याः देवाः सन्ति (यत्र प्राक्तनाः सृष्टिसाधनसमर्थाः देवाः तिष्ठन्ति)।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुक्तिसंग्रामः

आख्याता – Tonight's play मुक्तिसंग्रामः (struggle for freedom) is based on some events that took place between 1930 and 1934.

Surya Sen, a high school teacher and his group, mostly his teen-age students, fought against the British and captured the Chittagong area and declared it free. For three days the Indian flag was fluttering there gloriously. Finally the British had to bring reinforcements to recapture Chittagong.

In this struggle for freedom many were killed, and Surya Sen and a few others of his group were hanged.

Three of Surya Sen's letters, one to his elder brother's wife and the others to his friends throw light on his personality.

When the Mother saw the photos of Surya Sen and his group, She remarked –

"They look so innocent, but very determined and devoted.

"I am sure that the movement Sri Aurobindo initiated in order to free India made such people spring forth, people for whom to live for the Motherland was the only life worth living. What self-abnegation and self-effacement ! It is quite obvious that their love for the Motherland was the outcome of Sri Aurobindo's

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

patriotic speeches. His words inspired them to sacrifice their lives for the glory of India."

The first scene of tonight's play begins in a park where a farewell party is arranged for Ramesh, son of a C.I.D. officer, who is to be admitted in Surya Sen's school the next day.

प्रथमदृश्यम्

(पक्षिणां कलरवः। प्रातःकालीन-रागेण वंशीध्वनिः।)

शाश्वतः – *(उद्यानस्य शोभां पश्यन्)* सुन्दरम्! प्रीतिभोजाय उत्तमं स्थानम्।

श्वेता – उद्यानमिदं सत्यं मनोहरम्।

शाश्वतः – *(भास्करस्य विशालं भोज्यवाहं दृष्ट्वा)* आम्, अपूर्वम्!

श्वेता – पश्य अत्र, नूतनं पुष्पम्। कियत् सुन्दरम्! मया कुत्रापि न दृष्टम्।

भास्करः – हे, भोज्यवाहम् एकलं त्यक्त्वा कुत्रापि न गच्छ।

शाश्वतः – त्वमपि न गच्छ। अन्यथा सर्वं खादिष्यामि।

भास्करः – जानामि। भोजने तव अपार आनन्दः। किन्तु 'एकः स्वादु न भुञ्जीत'। यदा खादिष्यति, माम् आह्वय। अहं निकटे अस्मि।

श्वेता – पश्य, पश्य तत्र।

भास्करः – किम्?

श्वेता – त्वं मन्दः।

भास्करः – किम् अस्ति?

श्वेता – शशकः, गुल्मान्तरे लुक्कायितः।

भास्करः – कुत्र? *(अन्विष्यन् निर्गतः। श्वेता अपि निर्गता)*

जयदेवः – *(प्रविश्य)* रमेशो नागतः?

शाश्वतः – स न आगमिष्यति। त्वया कुत्र आगमनाय कथितम्?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जयदेवः – अत्र।

शाश्वतः – अत्र इति कुत्र ?

जयदेवः – अत्र इति अस्मिन् उपवने, अस्य तडागस्य निकटे, अस्य बकुल-वृक्षस्य तले।

शाश्वतः – किन्तु अहं कथयामि – रमेशः न आगमिष्यति। त्वं भास्करम् आह्वय। अहं भोज्यवाहम् उद्घाटयामि।

जयदेवः – नहि, किञ्चित्कालं प्रतीक्ष्य खादिष्यामः।

शाश्वतः – *(रुष्टः)* किञ्चित्कालम् ? क्षुधया उदरं गर्जति।

जयदेवः – अहमपि क्षुधितः। किन्तु अद्य रमेशेन सह अस्माकम् अन्तिम-भोजनम्। अवश्यं स आगमिष्यति।

शाश्वतः – कुतस्त्वं न बोधसि ? श्वः प्रभाते रमेशेन राष्ट्रिय-विद्यालयः प्राप्तव्यः। तदर्थं व्यस्ततायां तेन अत्र आगमनं विस्मृतम्।

जयदेवः – रमेशः त्वद्वत् नास्ति।

शाश्वतः – अरे, व्यस्ततायां सर्वेषां विस्मरणं भवति। ममापि भवति।

जयदेवः – किन्तु अहम् इदं न बोधामि – अस्माकं विद्यालयं त्यक्त्वा रमेशः दूरस्थं राष्ट्रिय-विद्यालयं किमर्थं गच्छति ? किम् अस्माकं विद्यालयः साधु नास्ति ?

शाश्वतः – तन्नास्ति बन्धो ! अत्र किमपि रहस्यं वर्तते। रमेशस्य पिता आङ्ग्लशासकानां विश्वस्त-सेवकः। स किमर्थं निजपुत्रं राष्ट्रिय-विद्यालयं नयति ? चिन्तय किञ्चित्।

जयदेवः – आम्, किमपि अस्ति।

सावित्री – एँ फलानि ! साधुफलानि, स्वादुफलानि, एँ फलानि . . .

शाश्वतः – हेऽ ! सा आगच्छति !

जयदेवः – किं सा एव या अस्माकं विद्यालयस्य निकटे फलविक्रयं करोति ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शाश्वतः – आम्, चल फलं खादिष्यावः।

जयदेवः – *(गोहे धनं दृष्ट्वा)* चल। धनम् अस्ति।

शाश्वतः – ममापि अस्ति। लुक्कायस्व। तया सह विनोदं करिष्यावः।

सावित्री – ऍं फलानि, साधुफलानि, स्वादुफलानि, मिष्टफलानि, पुष्टफलानि, ऍं फलानि। उह् *(करण्डं स्थापयति)*, अत्र किञ्चित् विश्रामं कृत्वा गमिष्यामि। सूर्य उपरि नागतः, तथापि इयद् उष्णम्! *(फलं चोरयन्तं शाश्वतं जयदेवं च दृष्ट्वा)* हे! चौरः *(फलं क्षेप्तुम् उद्यता)*।

शाश्वतः – क्षिप, क्षिप।

सावित्री – त्वं राक्षसः अत्र कथं प्राप्तः ?

शाश्वतः – वनविहारार्थम्। क्षिप, क्षिप। अहं धर्तुं जानामि। क्षिप।

सावित्री – देहि फलम्।

शाश्वतः – एतत् तव फलम् ?

सावित्री – नहि, तव फलम्! दुर्बुद्धे!

शाश्वतः – प्रथमं निजफलानि गणय। तत्परं गालिं देहि। वृथा गालिदानं महापापम्।

सावित्री – महाभारतं मां न श्रावय।

रमेशः – *(प्रविश्य)* शाश्वत! किं करोषि ?

जयदेवः – *(शाश्वतं प्रति)* पश्य, रमेश आगतः।

शाश्वतः – शीघ्रं भास्करम् आह्वय। खादिष्यामः।

सावित्री – पश्य वत्स! एष मां सन्तापयति। मम फलानि चोरयित्वा खादति।

रमेशः – जानामि अम्ब! एतौ अतीव दुष्टौ, विशेषेण एष शाश्वतः।

सावित्री – आम् पुत्र! एष तु दुष्टानां गुरुः। मम फलानि चोरयित्वा माम् उपदिशति, मह्यं ज्ञानं ददाति।

शाश्वतः – अस्तु, अहं ज्ञानं ददामि। किन्तु एषा दक्षिणां न ददाति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जयदेवः – *(सावित्रीं प्रति)* एकलव्यः दक्षिणारूपेण अङ्गुष्ठम् अददात्। त्वं तथा कृपणा – एकं फलं दातुं न शक्नोषि ?

शाश्वतः – देहि दक्षिणाम्। *(फलानि ग्रहीतुं गच्छति)*

सावित्री – पश्यसि, पश्यसि अस्य दुष्टताम् ! अधुनैव गत्वा तव पितरं कथयिष्यामि। स एनं धृत्वा कारागारे क्षेप्स्यसि। तत्र अस्य हस्तौ, पादौ बद्ध्वा, ताडयित्वा, ताडयित्वा . . . *(अतीव दुःखेन उपविशन्ती)* नहि, नहि भगवन् ! यत् करालं दृश्यं मया दृष्टम्, यत् कष्टं मया प्राप्तम्, तत् अन्या कापि माता न प्राप्नुयात्। आङ्ग्ल-पिशाचानाम् अत्याचारः अस्माकं पुत्रपौत्रेषु कदापि न भवेत्, कदापि न भवेत्।

जयदेवः – हठात् अस्याः किं जातम् ?

रमेशः – अस्या एकमात्र-पुत्रः आङ्ग्लसैनिकैः मारितः।

जयदेवः – तस्य अपराधः ?

रमेशः – तस्य अपराधः – मुक्तिसंग्रामः। तस्य अपराधः – भारतमातुः स्वाधीनतायै आङ्ग्लविरोधि आन्दोलनम्।

शाश्वतः – क्षमस्व अम्ब ! *(धनं करण्डे स्थापयति।)*

जयदेवः – *(धनं करण्डे स्थापयित्वा)* पुनरेवं कदापि न करिष्यावः।

रमेशः – वीरजननी वन्दनीया त्वम्। *(प्रणमति)*

सावित्री – यूयं सर्वेऽपि वीरजननीनां सन्तानाः। किन्तु स्वार्थपरता, दीनता, अज्ञानता युष्माकं बुद्धिं मोहितवती। यूयं निजदेशस्य गौरवं विस्मृतवन्तः।

शाश्वतः – किम् अस्माकं देशस्य गौरवम् ?

सावित्री – किं कथयसि ? अरे वटवः, यूयं तस्य देशस्य सन्तानाः यत्र वीरबालक-भरतः सिंहेन सह खेलति स्म। यूयं तस्य देशस्य सन्तानाः यत्र पञ्चवर्षीय-बालक-श्रीरामः असुरान् अमारयत्। यूयं तस्य देशस्य सन्तानाः यत्र शिशुपुत्र-श्रीकृष्णः राक्षसान् व्यनाशयत्। कुत्र युष्माकं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वीरत्वम् ? किं कुरुथ यूयम् ? यदा आङ्ग्लपिशाचवृन्दं भारतमातुः वक्षसि उपविश्य रक्तपानं करोति तदा यूयं वनविहारं कुरुथ, प्रीतिभोजं कुरुथ ? *(दुःखेन करण्डं गृहीत्वा निर्गता।)*

द्वितीयदृश्यम्

(राष्ट्रिय-विद्यालयः। सूर्यसेनः कार्यालये उपविश्य 'आर्य'पत्रिकां पठति। भृत्यः चक्रधरः रमेशस्य पितरम् आगच्छन्तं दृष्ट्वा सहसा प्रविश्य)

चक्रधरः – आर्य, स रक्षिपुरुषः पुनरागच्छति।

सूर्यसेनः – *(प्रसन्नभावेन)* साधु।

चक्रधरः – साधु ? तस्य विराड्रूपं मम सर्वाङ्गं कम्पयति।

सूर्यसेनः – अरे, भयं किमर्थम् ?

चक्रधरः – तस्य रूपमेव तादृशम्। मम सन्देहो भवति। स किमर्थं निजपुत्रम् अत्र त्यजति ?

सूर्यसेनः – *(गम्भीरभावेन)* चक्रधर !

चक्रधरः – आम् आर्य !

सूर्यसेनः – किं कर्तव्यम्, किं न कर्तव्यम् इति अस्मिन् विषये त्वम् अधिकं जानासि ?

चक्रधरः – नहि आर्य !

सूर्यसेनः – तर्हि गच्छ। तं सादरं प्रवेशय।

चक्रधरः – अस्तु आर्य !

धीरः – सूर्य अस्ति ?

चक्रधरः – आम् आर्य ! सादरं प्रविशतु।

धीरः – सुप्रभातं सूर्य !

सूर्यसेनः – सुप्रभातं धीर ! त्वया ह्यः आगन्तव्यम् आसीत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धीरः – मम विवशतां तु जानासि। ह्यः कोऽपि आङ्ग्लजनः मारितः।

सूर्यसेनः – ओ एवम्! अपराधी धृतः?

धीरः – अवश्यम्। मुञ्च तत्। प्रतिदिनं किमपि किमपि घटते। अधुना मम निजकथां शृणु। एष रमेशः। त्वं यथा इच्छसि तथा अस्य निर्माणं कुरु। *(रमेशं प्रति)* वत्स! एष मम अन्तरङ्ग-बन्धुः, तव पितृवत्। अत्र यथार्थ-शिक्षां प्राप्स्यसि। तव कापि असुविधा न भविष्यति।

सूर्यसेनः – *(घण्टिकां वादयति। प्रविशन्तं चक्रधरं प्रति)* रमेशं प्रार्थनागृहं नय। *(चक्रधरः तं नयति)*

धीरः – पश्य सूर्य, रमेशं तथा निर्माहि यथा मम चरित्रस्य कोऽपि कलङ्कः तस्मिन् न दृश्येत।

सूर्यसेनः – *(स्मित्वा)* गुप्तचर-विभागस्य निरीक्षकः आत्मनिरीक्षणम् अपि करोति?

धीरः – किम् आत्मनिरीक्षणे तव एव अधिकारः? जानासि, यदि अद्य रमेशस्य माता अजीविष्यत् तर्हि सा कियत् प्रसन्ना अभविष्यत्? रमेशः अत्र पठेत् इति तस्याः प्रबला इच्छा आसीत्।

सूर्यसेनः – स्वर्गीयपत्नीं प्रति तव श्रद्धां दृष्ट्वा ममापि श्रद्धा जायते। दुर्भाग्यम्, मया तस्या मुखं न दृष्टम्।

धीरः – सा सत्यं देवी आसीत्। अहं तस्या योग्यपतिः न अभवम्। बन्धो, रमेशः आवयोः एकमात्रसन्तानः। तस्य रक्षणं तव कार्यम्।

सूर्यसेनः – चिन्तां मा कुरु। रमेशः तव पुत्र आसीत्। अधुना स मम पुत्रः। *(घटीं दृष्ट्वा)* अस्तु धीर, त्वां किमपि पृच्छेयम्?

धीरः – पश्य सूर्य, आङ्ग्लशासकानां कार्यकलापं विहाय यत् किमपि इच्छसि, पृच्छ।

सूर्यसेनः – अहं जानामि। त्वं कदापि आङ्ग्लशासकानां रहस्यं न उद्घाटयिष्यसि। त्वम् अस्माकं गुप्तविषयान् तेभ्यः निवेदयितुं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शक्नोषि। तेषां गुप्तविषयान् अस्मभ्यं कथं निवेदयेः ? धीर, कुत्र गतः अस्माकं छात्रजीवनस्य उच्च आदर्शः, कुत्र लुप्तः सः दृढसङ्कल्पः ?

धीरः – बन्धो, जीवनस्य कठोर-वास्तवतायां तत् सर्वम् आकाश-कुसुमायते।

सूर्यसेनः – एष तव पलायन-मार्गः। देशस्य मुक्तिः, देशस्य हितं प्रथमम्। तत्र अस्माकं सर्वेषां दायित्वम् अस्ति। *(प्रथमघण्टा वाद्यते)* अधुना प्रार्थनासमयः। मया गन्तव्यम्। *(उत्तिष्ठति)*

धीरः – क्षणमेकम्। *(आवरकं ददाति)* सम्पूर्ण-वर्षस्य शुल्कम्।

सूर्यसेनः – एतावत् !

धीरः – स्थापय सूर्य, स्थापय।

सूर्यसेनः – पुनः कदा आगच्छसि ?

धीरः – यदा मां विवशं करिष्यसि।

सूर्यसेनः – अस्य अर्थः ?

धीरः – चिन्तय किञ्चित्। *(निर्गतः। धनपूर्णम् आवरकं गच्छन्तं धीरं च पश्यन् सूर्यसेनः विस्मितः तिष्ठति।)*

तृतीयदृश्यम्

(छात्राः प्रार्थनां कुर्वन्ति।)

अयि दिव्यमातृभूमे भवतीं वयं भजेम ।
जीवेम ते कृते च प्राणानपि त्यजेम ॥ १॥
इदमेव वाञ्छितं नः व्रतिनो वयं भवेम ।
प्राणार्पणेऽपि कीर्तिं तव नैव नाशयेम ॥ २॥
स्वकृते न चिन्तयेम स्वार्थं विसर्जयेम ।
तव गौरवाय सर्वं तुभ्यं समर्पयेम ॥ ३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अयि वन्द्य-मातृभूमे भवतीं वयं भजेम ।
जीवेम ते कृते च प्राणान् मुदा त्यजेम ॥ ४॥

चतुर्थदृश्यम्

(आङ्ग्लानां शस्त्रागार-लुण्ठन-विषयक-योजनां बोधयित्वा)

गणेशः – एषा अस्माकं योजना। अत्र भवतः किं मतम् ?

सूर्यसेनः – मम मतं ज्ञातुम् इच्छसि ?

गणेशः – आम्, भवान् किमपि वदतु।

सूर्यसेनः – उत्तरं श्रुत्वा नैराशं मा गच्छेः।

गणेशः – नहि आर्य ! वयं जानीमः, भवान् यद् वदिष्यति तद् अस्माकं मङ्गलाय एव।

सूर्यसेनः – तर्हि शृणु। या योजना युष्माभिः कृता तस्याः कार्यान्वयनं कथं सम्भवति ? यदा समग्रदेशे आङ्ग्लजनानाम् एकच्छत्रं शासनं प्रचलति तदा वयम् एकस्मिन् मण्डले कथमेकं विप्लवि-सर्वकारं रचयिष्यामः ? अहं युष्मासु नैराशं न जनयामि। किन्तु सर्वं विचार्य कर्तव्यम्।

अनन्तः – अस्या योजनायाः सर्वेऽपि पक्षाः अस्माभिः विचारिताः। अस्माकं योजनया युवसमाजः प्रेरितो भविष्यति। विदेशीय-साहाय्यं विनापि वयम् आङ्ग्लसैनिकान् पराजेतुं शक्नुमः – एष आदर्शः स्थास्यति।

गणेशः – अन्यथा भावि-वंशधरा अस्माकं निन्दां करिष्यन्ति। भाविकालस्य युवकाः कथयिष्यन्ति–अस्माकं पूर्वजाः भीरवः, कापुरुषाः आसन्। तस्य इदमेव प्रमाणं यत् त्रिंशत्कोटिसङ्ख्यकास्ते कतिपय-म्लेच्छानां दासत्वम् आजीवनम् अकुर्वन्। इमाम् अकीर्तिं वयं न इच्छामः।

सूर्यसेनः – साधु गणेश, साधु। तव उत्तरेण अहम् अतीव प्रसन्नः। युष्माभिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सह अहं पूर्णतः एकमतः। समग्रदेशः अस्माकं चट्टग्रामे प्रथम-विप्लवि-सर्वकारं पश्यतु। किन्तु इदं कार्यं तथा सरलं नास्ति। यूयं मॅकॉले-मानसपुत्राणां साम्मुख्यं कथं करिष्यथ ? अधुना तु तेषामेव शासनम्।

अनन्तः – एते मॅकॉले-मानसपुत्राः के ?

सूर्यसेनः – *(हसन्)* हॅं हॅं ! त्वं मॅकॉले-मानसपुत्रान् न जानासि ? *(गणेशं प्रति)* त्वं कथय।

गणेशः – नहि, भवान् कथयतु।

सूर्यसेनः – अस्माकं स्वजना एव मॅकॉले-मानसपुत्राः। अधुना या शिक्षा दीयते सा मॅकॉले-महोदयेन प्रचालिता। वस्तुतः तस्यापि कश्चिद् गुरुः आसीत्।

अनन्तः – एवम् ! कः स गुरुः ?

सूर्यसेनः – तस्य नाम एल्फिन्स्टन्। सः अतीव दूरदर्शी आङ्ग्लशासकः आसीत्। एकदा स निजबन्धुं प्रति यत् अलिखत् तत् त्रिकालसत्यम् अभवत्।

गणेशः – त्रिकाल-सत्यम् !

अनन्तः – स किम् अलिखत् ?

सूर्यसेनः – सः अलिखत् – बन्धुवर, एकदा अस्माभिः अयं देशः त्यक्तव्य एव। किन्तु तदर्थं दुःखं न कर्तव्यम्। भारतदेशात् आङ्ग्लसैनिकानां गमनात् परमपि भारते आङ्ग्लशासनं स्थास्यति।

अनन्तः – कथम् ?

सूर्यसेनः – एल्फिन्स्टन् अलिखत् – आङ्ग्लजनैः प्रचालिता आङ्ग्ल-भाषा, आङ्ग्लसभ्यता, आङ्ग्लसंस्कृतिः, आङ्ग्लनीतयः, आङ्ग्लानाम् आचारसंहिता भारतीयानां शासनं करिष्यन्ति।

गणेशः – सः कदा एतत् अलिखत् ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूर्यसेनः – त्वं गणेशः, मां पृच्छसि।

गणेशः – अहं नाम्ना गणेशः। पश्य, कुत्र मम लम्बोदरम् ?

सूर्यसेनः – किन्तु तव बलम्, तव बुद्धिः गणेशवत् असामान्या। केवलं रूपसादृश्यं नास्ति। रूपेण किम् ?

अनन्तः – आर्य, एल्फिन्स्टन् कदा एतत् अलिखत् ?

सूर्यसेनः – न्यूनतः शतवर्षेभ्यः पूर्वम् !

गणेशः – *(आश्चर्येण)* शतवर्षेभ्यः पूर्वम् !

सूर्यसेनः – आम्, स निजबन्धुं प्रति यत् अलिखत् तस्य सम्पूर्ण-कार्यं मॅकॉले-महोदयः अकरोत्। मॅकॉले कथयति स्म – We want to form a class of persons, Indian in blood and colour, but English in tastes, opinions, morals and intellect. मॅकॉले यथा ऐच्छत् तथा वयं कुर्मः। तस्य सङ्कल्प-बीजस्य वर्धिष्णुपादपा वयम्।

गणेशः – अस्य प्रतिकारः ?

सूर्यसेनः – तदेव त्वां पृच्छामि। येषां हृदयं रुद्धम्, ये केवलं बुद्धिद्वारेण पश्यन्ति, तेषां साम्मुख्यं कथं करिष्यथ ?

गणेशः – अस्ति उपायः – आत्मबलम्।

अनन्तः – न केवलम् आत्मबलम्, आत्मबलेन सह गुलिकाबलम् अपि।

सूर्यसेनः – तदा विजयः सुनिश्चितः। किन्तु हिंसा समस्यानां समाधानं नास्ति।

अनन्तः – तर्हि किम् आङ्ग्लानाम् अत्याचारम्, तेषाम् उत्पीडनं चिरकालं सहिष्यामहे ? ये अस्माकं प्राचीनां शिक्षाम्, संस्कृतिं नाशयन्ति, येषां शिक्षया वयम् अन्तःसारशून्या भवामः, स्वधर्मं त्यजामः, स्वजनान् प्रति घृणां कुर्मः, किं तेषां विधर्मिणां पूजा कर्तव्या ?

सूर्यसेनः – अस्माकं शास्त्रं कथयति – अतिथिदेवो भव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनन्तः – वयम् अवश्यम् अतिथिदेवा भवेम, न तु अतिथिनां दासाः।

सूर्यसेनः – साधु अनन्तसिंह, साधु। तव वचनं श्रुत्वा श्रीअरविन्दस्य वचनमेकं स्मरामि। सः अस्मान् अकथयत् – If we go on thinking that we are weak, we shall ever remain so. Let us believe in our strength and let us take the idea from Vedanta, think that we are strong and divine and powerful. Never mind the difficulties but proceed. श्रीअरविन्दस्य वचनम् अस्माकम् अर्थे मन्त्रतुल्यम्।

अनन्तः – आम्। वयम् अस्य मन्त्रस्य प्रयोगं करिष्यामः। यदा आङ्ग्ल-सैनिकाः मम मित्रं यतीन्द्रम् अमारयन् तदा प्रभृति अहं ज्वलामि।

गणेशः – बाघाजतिन्मरणस्य प्रतिशोधम् अवश्यं ग्रहीष्यामः। अहमपि त्वद्वत् ज्वलामि अनन्तसिंह !

सूर्यसेनः – साधु। यः स्वयं न ज्वलति सः अन्यान् कथं ज्वालयेत् ? ज्वल अनन्तसिंह, अधिकाधिकं ज्वल। स्वयं ज्वलित्वा अन्यान् ज्वालय। आत्मज्वालया भारतमातुः दीनम्, तमोग्रस्तं मुखम् उज्ज्वलं कुरु। श्रीअरविन्दस्य मुखेन भारतमाता अस्मान् पृच्छति – How many will live for me ? How many will die for me ? अस्य उत्तरम् अस्माभिर् दातव्यम्।

पञ्चमदृश्यम्

(Police Commissioner Sir Charles Tegart's office. He is busy with his files.)

Police – *(Rushing in salutes)* Sir, Sir !

Tegart – Who is there ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Police – सर्वनाशः Sir !
Tegart – What ? What do you mean by that ?
Police – आपद् Sir ! विपद् !
Tegart – Can't you see – I am very very busy with my files. Come to the point.
Police – घोरसङ्कटम् Sir ! *(क्रन्दति)*
Tegart – What is that gharri shakatam ?
Police – *(क्रन्दन्)* शकटं नास्ति Sir, सङ्कटम्, घोरसङ्कटम् !
Tegart – Dhira, Dhira !
Police – *(अपवार्य)* म्लेच्छं कथं बोधयामि !
Tegart – Dhira !
Dhira – Yes Sir !
Tegart – What is his गोरशकटम् ?
Police – Looting Sir !
Tegart – What ?
Police – Yes Sir, looting. Chittagong Police Armoury looting. Auxilliary Police Armoury looting.
Tegart – Are you telling me that the Chittagong Police Armoury and the Auxilliary Police Armoury have been looted ?
Police – Yes Sir, तदेव।
Tegart – What is that टडेव ?
Police – Looting Sir, shooting.
Tegart – When ? When did it happen ?
Police – Yesterday night Sir. Night 10 Sir, 10.
Tegart – You rascal ! You are giving this vital information after 24 hours !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Police – No उपायः Sir ! Telephone Exchange fire ! Telegraph Office fire ! No phone Sir ! Railway line नष्टम्, आगमने कष्टम्।

Dhira – Sir, he means to say that the miscreants have set fire to the Telephone Exchange and the Telegraph Office and they have removed the Railway lines.

Tegart – Who is behind all this ?

Police – Surya Sen, Sir ! *(gives a pamphlet)*

Tegart – Who is this Surya Sen ?

Dhira – He is a teacher of the local High School Sir !

Tegart – How daring ! *(gives the pamphlet to Dhira)* It is an open declaration of war against the British regime. You Indian dogs !

Dhira – *(Reading the pamphlet)* Sir, they have produced a detailed account of atrocities inflicted on them. It was widely circulated yesterday Sir !

Tegart – But how could they do that ?

Police – Very easy Sir. Police dress putting, तैः कृतं cheating.

Tegart – Hum ! They seem very cunning.

Police – Yes Sir, किन्तु वृथा Sir !

Tegart – What is that व्रिटा ?

Police – वृथा Sir ! Rifles looting, Lewis gun looting, किन्तु न use Sir !

Tegart – How is that ?

Police – Catridges no taking Sir ! No catridge, no shooting. Very good Sir !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Tegart – Hah ! hah ! hah ! Stupid Indians ! Dhira !
Dhira – Yes Sir !
Tegart – Get ready.
Dhira – Yes Sir !
Tegart – Let us nab the culprit today itself.
Dhira – Yes Sir ! *(Both the police and Dhira salute.)*

षष्ठदृश्यम्

(Company, kneel, fire इति Tegart स्वसैनिकान् आदिशति। स्वदेशिजनाः 'वन्दे मातरम्', 'वन्दे मातरम्' इति उच्चैः वदन्ति। भीषणं युद्धं भवन्ति। स्वदेशिजनाः बहवः म्रियन्ते। ततस्ते पृष्ठतः अपसरन्ति पलायन्ते च।)

Tegart – Why are you running away ? Listen, listen to your scriptures. Your scriptures say – If you die in the battlefield, your soul goes straight to the highest heaven. Don't miss this golden opportunity. Come back, you rogues ! *(अनुधावति)*

सप्तमदृश्यम्

(Tegart's office. He is thinking something.)

Dhira – Good morning Sir !
Tegart – Morning. Take your seat. I have specially called you to know about Surya Sen. Two years have passed and you have not been able to catch him. It is a shame.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Dhira – They are hiding in the dense forest Sir. We have asked for reinforcements. We shall surround that whole area and comb it Sir.

Tegart – Is it true that your son is studying in Surya Sen's school ?

Dhira – Yes Sir ! It was his mother's last wish.

Tegart – All right, all right. Is it true that Surya Sen was your classmate ?

Dhira – Yes Sir ! But duty is greater than friendship Sir !

Tegart – Yes. But people don't practise what they preach. I want Surya Sen in two-days' time. Can you do that ? I would like to remind you that your promotion is due in three days. That's all.

Dhira – *(salutes).*

अष्टमदृश्यम्

(छद्मवेषेण त्रयः रक्षिपुरुषाः ज्योतिषस्य द्वारे शब्दं कुर्वन्ति। ज्योतिषः द्वारम् उद्घाटयति। रविः अब्दुल्ला च प्रच्छन्नं सर्वं शृणुतः।)

सुकृत् – भवान् शान्तनु-महाशय ?

शान्तनुः – आम्, आगम्यताम्, अभ्यन्तरम् आगम्यताम्।

सुकृत् – अस्माभिः श्रुतम्, भवान् ज्योतिषविद्यायाम् अतीव निपुणः।

शान्तनुः – जना एवं कथयन्ति। किन्तु कुत्र विद्यायाः अन्तः ?

सुकृत् – आर्य, अस्य अङ्गुलीयकं हारितम्। भवान् कथयितुं शक्नोति कुत्र तद् अस्ति इति।

शान्तनुः – अवश्यं शक्नोमि, उपविशतु। *(अरिन्दमं प्रति)* भवान् तत्र उपविशतु। एष कथयामि। *(मन्त्रं पठति।)* उपविशतु, उपविशतु। *(द्वौ*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपविशतः) एष नखदर्पणेन कथयामि। तस्य एकम् अङ्गुलीयकं गृहे अस्ति, अन्यदेकं गोहे। *(सुकृतं प्रति)* भवान् तस्य दक्षिणगोहं पश्यतु।

सुकृत् – साधु ज्योतिषमहाशय, साधु।

अरिन्दमः – अद्भुतो भवान्। गृह्णातु स्वल्पमेतत्। *(स्योतं ददाति)*

शान्तनुः – एतावत्स्वर्णमुद्राः ! एका पर्याप्ता। *(एकां गृह्णाति)*

अरिन्दमः – नहि, भवान् सर्वं गृह्णातु।

शान्तनुः – नहि, परद्रव्येषु लोष्टवत्।

अरिन्दमः – मम एकः प्रश्नः।

शान्तनुः – कथयतु। निःसङ्कोचं कथयतु।

अरिन्दमः – भवान् एतत् स्थापयतु। *(स्योतं ददाति)*

शान्तनुः – अस्तु, अस्तु। भवतः सादर-निर्बन्धं निराकर्तुं न शक्नोमि।

अरिन्दमः – कृपया कथयतु, सूर्यसेनः कुत्र अस्ति ?

शान्तनुः – सूर्यसेनः ? नहि, नहि।

अरिन्दमः – पश्यतु ज्योतिष-महाशय ! सूर्यसेन एकः पागलः। आङ्ग्लजनैः सह कोऽपि विरोधं करोति ? शृगालः सन् सिंहेन सह विरोधः ! छिः छिः।

शान्तनुः – नहि, नहि।

सुकृत् – पश्यतु, तस्य मत्तताकारणात् कियन्तः युवकाः मृताः, कियन्तः आहताः, कियन्तः कारागारे निर्यातनां सहन्ते ! बहुजनसुखाय, बहुजनहिताय एकस्य बलिदानं न दोषावहम्।

शान्तनुः – नहि, नहि। अहं न शक्नोमि।

अरिन्दमः – भवान् यत् इच्छति तत् प्राप्स्यति। कथयतु, भवान् किम् इच्छति ? अधिक-स्वर्णमुद्राम् ? विशाल-प्रासादम् ?

सुकृत् – दास्यामः। *(अरिन्दमं प्रति)* ऍ, कस्मां [illegible] ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अरिन्दमः – अवश्यम्।

शान्तनुः – अधिकं मा वद। शापं दास्यामि।

दीपकः – *(छद्मवेषम् अपाकृत्य)* तादृक्-साधना त्वया न कृता। वद – वदसि न वा ? *(छुरिकां दर्शयन् शान्तनुं भूमौ पातयति। सुकृत्, अरिन्दमश्च छद्मवेषम् अपाकुरुतः।)*

अरिन्दमः – न न, छुरिकां न दर्शय। तातः कथयति।

दीपकः – कथयसि न वा ?

शान्तनुः – *(भयेन)* कथयामि।

दीपकः – कथय।

शान्तनुः – सावित्रीगृहे।

दीपकः – चल तत्र।

शान्तनुः – नहि, मुक्तिवाहिनी . . .

सुकृत् – मुञ्च तम्। अहं सावित्रीगृहं जानामि।

दीपकः – चलतम्। *(सर्वे गताः। अब्दुला रवेः कर्णे किमपि कथयति। रविः निष्क्रान्तः।)*

शान्तनुः – *(उत्थाय)* ओह्, आह्! शनि-कवलात् मुक्तः।

अब्दुल्ला – *(प्रविश्य)* किन्तु राहु-कवलात् मुक्तिर् नास्ति। *(छुरिकां दर्शयति।)*

शान्तनुः – *(भयेन)* कस्त्वम् ?

अब्दुल्ला – विश्वासघातक ! देशहितात् निजजीवनम् अधिकं मन्यसे ? *(मारयितुम् उद्यतः)*

शान्तनुः – नहि . . .

अब्दुल्ला – कुलाङ्गार, यः सूर्यसेनः मातृभूमिं मोचयितुं प्राणपणेन चेष्टते, तस्य त्वं मृत्युकारणं भवसि। देशद्रोहिन्! *(मारयति)*

शान्तनुः – आ . . . आ . . . *(मृतः)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नवमदृश्यम्

(शाश्वतः, जयदेवः, भास्करः भोजनं कुर्वन्ति। सावित्री भोजनं परिवेषयति।)

भास्करः – *(सावित्रीं प्रति)* कल्पना कुत्र ?

सावित्री – सा अभ्यन्तरे खादति।

रविः – *(सत्वरं प्रविश्य)* Police ! *(एतत् कथयित्वा पलायते। अन्ये भोजनं त्यक्त्वा पलायन्ते। सूर्यसेनः शाटीं धारयित्वा, कलसं धृत्वा सम्मुखद्वारेण गच्छति।)*

अरिन्दमः – तिष्ठ।

सुकृत् – अरे, महिलां न आयासय।

अरिन्दमः – एषा का ?

सुकृत् – सावित्र्याः पुत्रवधूः। मुञ्च।

अरिन्दमः – *(सावित्रीगृहं प्रविश्य)* तव गृहे अन्वेषणीयम्।

सावित्री – किमर्थम् ?

सुकृत् – आऽहा ! चन्द्रमुखी किमपि न जानाति। *(अवगुण्ठनवतीम् अन्यां महिलां दृष्ट्वा)* का सा ?

सावित्री – सा मम पुत्रवधूः।

अरिन्दमः – तव पुत्रवधूः ? तव पुत्रवधूस्तु जलम् आनेतुं नदीं गता। एषा का ?

सावित्री – मम पुत्रवधूः।

सुकृत् – शठे ! सूर्यसेनं शाटिकया आच्छादयसि ?

सावित्री – भवान् किं कथयति ?

सुकृत् – मया स्वनेत्राभ्यां दृष्टम् – अधुनैव अस्मात् गृहात् तव पुत्रवधूः कलसं गृहीत्वा नदीम् अगच्छत्। एषा तव द्वितीया पुत्रवधूः ? पश्यामि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सावित्री – मा स्पृश।

सुकृत् – सूर्यसेन, वधूवेषं त्यज। नटवर, कियत्कालम् अभिनयं करिष्यसि ? अवगुण्ठनं मुञ्च। *(अवगुण्ठनम् अपसार्य, मुखं दृष्ट्वा आश्चर्येण)* हें ! तर्हि सा का ? वयं वञ्चिताः ! *(क्रोधेन)* सूर्यसेन ! अद्य तव मुक्तिर् नास्ति।

अरिन्दमः – हुँः, रण्डे ! विद्रोहकारिणे आश्रयदानस्य परिणामं जानासि ? सावधानम्। *(द्वौ निष्क्रान्तौ।)*

(रक्षिपुरुषाः सूर्यसेनं वन्दिनं कृत्वा आनयन्ति।)

सूर्यसेनः – यूयं स्वदेशीयाः, स्वजातीयाः सन्तः मां मृत्युमुखं प्रेषयथ ? एषा युष्माकं देशप्रीतिः ?

दीपकः – चल। देशप्रीतिं दर्शयति। एते पञ्चषाः देशम् उद्धरिष्यन्ति। चल। *(नुदन् नयति।)*

दशमदृश्यम्

(कारागारः। सूर्यसेनः उपविश्य पत्रवाचनं नाटयति। तस्य ध्वनिलिखितः कण्ठस्वरः श्रूयते –)

स्नेहमयि ज्येष्ठवधु !

मम भक्तिपूर्ण-प्रणामं स्वीकुरु। उच्चन्यायालयस्य निर्णयं श्रुत्वा मन्ये भवन्तः गभीरं शोकग्रस्ताः। एतत् स्वाभाविकम्। किन्तु विगत-नव-मासेषु अस्य आघातस्य सहनार्थं भवतां हृदयम् अवश्यं प्रस्तुतं स्यात्। अहम् अत्र अतीव आनन्देन कालं यापयामि। मम अल्पमपि दुःखं नास्ति। भवद्भिरपि दुःखं न कर्तव्यम्।

Dear brothers and sisters,

Ideal and unity is my farewell message. Rope is

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

hanging over my head. Death is knocking at my door. My mind is soaring towards Eternity. This is the time for 'Sadhana'. This is the time for preparation to embrace death as a friend.

प्रियबन्धवः,

अग्रे सरत। पृष्ठं नैव गच्छत। दासत्वस्य दिनं समाप्तप्रायम्। स्वाधीनतायाः उषालग्नम् आसन्नम्। उत्तिष्ठत, जागृत, कर्तव्यं कर्म कुरुत। नैराश्यग्रस्ता मा भवत। मुक्तिसंग्रामे अस्माकं विजयः सुनिश्चितः। वन्दे मातरम्। *(ध्यानस्थः)*

Tegart – (प्रविश्य) हुँः ! There can never be two suns in one empire. The time has come for you to set. Surya Sen, count your minutes. This is your last sleep; no, no, eternal sleep. Ha...ha...ha... Scoundrel, for three days you had eclipsed the never-setting sun of the British empire. Henceforth if anybody dares to touch it, he will meet with the same fate. *(निष्क्रान्तः)*

भारतमाता – *(प्रविश्य)* सूर्य, वत्स सूर्य ! प्रिय पुत्र मम। उत्तिष्ठ। शुभमुहूर्त एषः।

सूर्यसेनः – का त्वं देवि ! कर्णे अमृतं सिञ्चसि। हृदयं परिपावयसि !

भारतमाता – मां न जानासि वत्स ? अहं तव आत्मीया। *(आशिषं ददाति)*

सूर्यसेनः – मातः, त्वम् ! किन्तु, किन्तु तव शरीरे . . .

भारतमाता – शृङ्खला नास्ति। तेन तव आश्चर्यं भवति। नैवम् ?

सूर्यसेनः – आम् मातः ! भ्रान्तिर् जायते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारतमाता – अहं मुक्ता। मम शरीरे शृङ्खला कथं स्यात् ?

सूर्यसेनः – त्वं मुक्ता ? कथम् ? मम देशस्तु अधुनापि पराधीनः।

भारतमाता – नहि वत्स, स्थूलजगति त्वं पराधीनतां पश्यसि। किन्तु सूक्ष्मजगति भारतं स्वाधीनम्। स्थूलतः स्वाधीनतायाः अभिव्यक्तिः अनिवार्या।

सूर्यसेनः – मम भारतं स्वाधीनम्! मम प्रियभारतं शृङ्खलामुक्तम्! अहो, अद्य मम स्वप्नः सार्थकः। अद्य मम मनोरथः सिद्धः। मातः, हे भारतजननि, मम कार्यं समाप्तम्। अधुना तव आनन्दधाम प्रतिगन्तुम् इच्छामि मातः! गृहाण माम्।

भारतमाता – एहि वत्स, एहि। एहि मम क्रोडम्। एहि। *(निष्क्रान्ता। ततः अन्धकारे आख्यातुः अनन्त-गणेशयोश्च ध्वनिलिखित-वचनं श्रूयते–)*

आख्याता – On the 12th of January 1934, at 12.41 A.M., Surya Sen, one of the hero warriors of our country, was hanged without prior intimation.

अनन्तः – गणेश, आर्यसूर्यसेनं विना मुक्तिसंग्रामं कथं चालयिष्यामः ?

गणेशः – अनन्तसिंह, चिन्तां मा कुरु। अस्माकम् अध्यापकः न मृतः। त्वं न स्मरसि ? एकदा सः देशप्राण-महापुरुषाणां वीरत्वगाथां श्रावयन् अवदत् – यदि कोऽपि महान् आत्मा लक्ष्यपूर्तेः पूर्वं शरीरात् विच्छिन्नो भवति तर्हि सः स्वस्य अनुयायिनां राष्ट्रस्य वा शरीरं प्रविशति। अतः स सूक्ष्मतः न केवलम् अस्मान्, कोटिशः जनान् प्रेरयिष्यति। अनन्तसिंह, प्रसन्नो भव। इतः परं मुक्तिसंग्रामः तीव्रतरं भविष्यति। आसन्ना भारतमातुर् मुक्तिवेला।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकादशदृश्यम्

(सूर्यसेनस्य अस्थिकलसः पीठस्य उपरि शोभते। स्वदेशिजनाः समवेताः। रक्षिपुरुषः धीरः बृहत्पुष्पवलयं पीठस्य निकटे स्थापयित्वा नतमस्तकः तिष्ठति। ततः सर्वे गायन्ति –)

वन्दे भारतजननीं वन्दे भारतजननीं वन्दे भारतजननीम् ।
चारुहासमयि चारुभासमयि देवि त्वां प्रियजननीम् ।
जननीं जननीं जननीम्। वन्दे भारत ...

नीलसमुद्रविधौतपदाब्जां ताल-तमाल-सुमञ्जुलकुञ्जाम् ।
हिमगिरिमण्डितमुकुटसुसज्जाम्
जननीं त्वां प्रियजननीम्। जननीं जननीं जननीम्। वन्दे भारत ...

श्यामल-सस्य-सुशोभित-गात्रां ज्ञानि-पराक्रमि-साधु-सुपुत्राम् ।
सुर-मुनि-धाम सदा सुपवित्राम्
जननीं त्वां प्रियजननीम् । जननीं जननीं जननीम्। वन्दे भारत ...

(२६. ९. ९७ दिनाङ्के आश्रमविद्यालये अभिनीतम् इदं नाटकम्। अस्मिन् नाटके सूर्यसेनः, गणेशः, अनन्तः, सावित्री, Tegart इति एतानि नामानि ऐतिहासिकानि अन्यानि च अस्मदीयानि।)

भोज्यवाहम्–*tiffin carrier.* करण्डः–*basket.* गोहः–*pocket.* आवरकम्–*envelop.* स्योतम्–*bag.* पीठम्–*stool.*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ISBN 81-7058-690-9

Rs 25/-

Price : Rs. 25/-

9788170586906

CC-0. Nepal Sanskrit Academy, Kathmandu Collection